Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

SAMSKRITASRI

A Monthly Journal of
Samskrit Education Society

தனி ப்ரதி
விலை ரூ. 4

FEBRUARY - 2019

ஸம்ஸ்க்ருதஶ்ரீ:

ஸம்ஸ்க்ருத கல்விக்
கழக மாத இதழ்
212/13-1,
செயிண்ட் மேரிஸ் ரோடு,
மந்தைவெளி, சென்னை-28



चिन्मात्रं यदभूदखण्डमतुलं ब्रह्मेति गीतं महः
तन्मात्रादिविभावनैः परिणतं ब्रह्मादिकीटान्तकम्।
तन्मात्रं जगदुद्धियोर्षदखिलं श्रीकामकोटेर्मठे
दृङ्मात्रेण दधाति मुक्तिसुपथं श्रीमज्जयेन्द्राभिधम्।।

இடை வெளியற்றதும் இணையற்றதும் ப்ரஹ்மம் என்றும் போற்றப்பட்டதுமான ஒளி ஞானம் ஒன்றேயான வடிவாக இருந்தது. அதே ப்ரஹ்மம் தன்மாத்ரை முதலிய பொருட்களாக மாறி நான்முகன் முதல் சிற்றுயிர் ஈறாக பரிணமித்திருக்கிறது. அதே ப்ரஹ்மம் எல்லா உலகையும் கரையேற்றும் பொருட்டு ஸ்ரீகாமகோடி மடத்தில் ஸ்ரீ ஜயேந்த்ரர் என்னும் பெயரோடு இலங்கி தன் கடைக்கண் பார்வையாலேயே முக்திக்கான வழியை அளிக்கிறது.

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

✆ 24951402

ஓ

THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

Secretary & Treasurer : **Sri G. SITHARAMAN**, F.C.A.
Editor and Publisher : **S. SRINIVASA SARMA**
Associate Editor : **Dr. G. Sankaranarayanan**
Department of Sanskrit,
SCSVMV Univeristy, Enathur,
Kanchipuram, Tamilnadu
Cell : 99941 03957

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், ஆழ்வார்ப்பேட்டை	98843 12214
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம், மேடவாக்கம்	9884158110
3.	ஸ்ரீமதி சாந்தி அசோக், மந்தைவெளி	24951402
4.	ஸ்ரீமதி கௌரீ கருணாகரன், மைலாப்பூர்,	24320544
5.	ஸ்ரீமதி ரமாசுந்தரராஜன், சென்னை -95,	65687635
6.	ஸ்ரீமத் பார்வதீ ராமசந்திரன் அண்ணா நகர்	26215719
7.	ஸ்ரீ R. முத்து கிருஷ்ண ன் கொரட்டூர்	26872430
8.	ஸ்ரீ S. ரங்கநாத சர்மா, சேலையூர்	222[illegible]
9.	ஸ்ரீமதி புவனேச்வரீ ராஜகீழ்பாக்கம்	9841212[illegible]7
10.	ஸ்ரீ K. ராஜேச்வரீ மாடம்பாக்கம்	996283[illegible]9
11.	ஸ்ரீ S. ஹரிஹரன் நங்கைநல்லூர்	984140[illegible]59
12.	ஸ்ரீ S. அனந்தன், மதுராந்தகம்	9894709[illegible]8
13.	ஸ்ரீ P.R. சுப்ரமண்யம், ஓ.ஓ. நகர்	23640864
14.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய ஸ்ரீரங்கம்	2430632
15.	ஸ்ரீமதி ராஜம் சுந்தர், திருநெல்வேலி	9488326850
16.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன், திருநின்றவூர்	9445703470
17.	ஸ்ரீ R. ரங்கநாதன், காஞ்சீபுரம்	97910 55428
18.	ஸ்ரீ C.A. ஏகாம்பரம், கோயம்புத்தூர்	0422-2233242
19.	ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,	0487-2382964
20.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், Mumbai East	09757115154

ஸ்ரீ வி. கோதண்டராமன், Mrs. கீதா ரேகா,ஆதம்பாக்கம் 9444469638.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला : ४१ February - 2019 पुष्पम् : ०२

कलि : ५१२० विलम्बि - कुम्भमासः ४१-०२

The Samskrit Education Society Established with the blessings of His Holiness **SRI MAHASWAMIGAL** of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:
Old 212/13-1, St.Mary's Road,
Mandaiveli, Chennai – 600 028.

PRESENT ACTIVITES
1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI Founder Editor
Vaidyasri
S.V.RADHAKRISHNA SASTRI

Hon. Editor
Dr.N.VEEZHINATHAN

Editor and Publisher
Prof.S.SRINIVASA SARMA

Associate Editor
Dr. G. SANKARANARAYANAN

Hon. Academic Advisors :
Dr.K.SRINIVASAN,
K.S.R.I.Chennai.
SMT. SANTA SRINIVASAN, SES,
Chennai.

Associate Editors :
Pandit S. Ranganatha Sarma,
Chennai.
Prof. G. Srinivasu, Kanchipuram.
Prof.C.V.Seshadri, Chidambaram.

Technical Assistants :
Dr. V. Nagarajan
Dr. S. Thiagarajan

"DD/Cheque should be sent by Speed Post only"

१. सम्पादकीयम् ४
२. निपुणप्राघुणकम्.....५
३. सत्यम् अद्वैतम्.....७
४. रघुवंशम् १०
५. मन्त्रार्थचिन्तनम् १३
६. तिरुक्कुरल् १५
७. रूपकावली.....१७
८. नीलकण्ठदीक्षितस्य.....१९
९. अष्टाङ्गहृदयम् २५
१०. करुणामृतम् २७
११. योगरहस्यम् २९
१२. माद्रीसुतौ पुष्पफले समृद्धे...३१
१३. मुक्तमौक्तिकम् ३४
१४. त्रिविधमौषधम् ३५
१५. शब्दविमर्शः ३९
१६. शास्त्रं ज्योतिः प्रकाशार्थम्...४२
१७. पदरञ्जनी ४८

SUBSCRIPTION RATES

ANNUAL	: Rs. 40/-
LIFE SUBSCRIPTION	: Rs. 400/-
PAGE DONATION	: RS.200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer.

The Samskrit Education Society
(Regd.),
Old 212/13-1, St.Mary's Road,
Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402
Mail: samskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सम्पादकीयम्

यद्घस्ताब्जमरन्दवाहतुलिता यद्वीक्षणैः पोषिता
यत्कारुण्यचयोद्धृता सुमहिता श्रीदेववाणीसुता।
तेषां वन्द्यजयेन्द्रदेशिकवराणां पादपद्मेऽञ्जलिं
भक्त्येयं विदधाति लेखकुसुमैः श्रीसंस्कृतश्रीः वरा।।

वसन्तवल्लोकहितं चरन्तो महान्तोऽनपेक्षितात्मसुखाः परार्थैकफलाः सततं परोद्धृत्यै यतन्ते। तादृशेषु यतयश्शुद्धसत्त्वा इत्यादिरीत्या परित्यक्तसकलसङ्गाः एव आत्मसुखापेक्षया विश्वोद्धरणं वितन्वानाः विलसन्ति। तादृशेष्वाध्यात्मिकोद्धरणेन साकं लौकिकस्तरेऽपि नानामेयोपायचयैः विहितजनोद्धरणैः काञ्चीकामकोटिपीठाधीशैः अनितरसाधारणा लोकसेवा व्यधायीति प्रत्यक्षदृष्टोऽयं विषयः। पञ्चषष्टिं यावत् समानां पीठाधिपत्यं वहताम्महताममीषां वेदविद्यावैद्यसेवादिकार्यक्रमाः आचन्द्रार्कं स्मरणीया इति निश्चप्रचम्।

सदा स्मेरवक्त्राः सततविहितचन्द्रमौलिसपर्याः सत्त्वैकमूर्तयस्ते आपामरपण्डितं सर्वानावर्जयन्तः मत्स्यण्डिकामिषेण वितरन्तो धर्मोपदेशमर्भकेषु, कुङ्कुमव्याजेन वितरन्तो मङ्गलं, अक्षतच्छलेन दर्शयन्तोऽक्षतं ब्रह्म व्यभ्राजन्त। तेषां करकमलमरन्दायिताः सेवायोजनाः अनेकाः अद्यापि वर्धितस्तरुरिव फलन्ति नितराम्। तद्यशोवितानच्छायाश्वासिताः आर्ताः अर्थहीनाश्च अद्यापि स्मरन्तस्तत्पादपद्मद्वन्द्वं निर्वृतिं परामाप्नुवते। परे ब्रह्मणि लीनानां तेषां प्रथमाराधनामहोत्सवः अस्मिन् मासि तच्छिष्यवर्यैः श्रीश्रीश्रीशङ्करविजयेन्द्रसरस्वतीसंयमीन्द्रैः प्रणतसौभाग्यलम्भकं समातन्यते। तेषां करकमलसंवर्धितेयं संस्कृतश्रीः तत्पादपद्मे निजाञ्जलिकुसुमं लेखरूपं समर्पयति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

निपुणप्राघुणकम् (भाणः)

Dr. SHANKAR RAJARAMAN
Bangalore

(परिक्रम्य अवलोक्य)

(साश्चर्यम्) अहो! मार्गोपनतैर्वयस्यगणैः सह सम्भाषमाण एव मयि कथमस्ताचलशिखरात्पतितो भगवानम्भोजिनीवल्लभः । अपि च -

अग्रे कैरवपारवश्यपिशुनः सूर्यास्तपर्याकुल-
व्योमश्रीनयनोदबिन्दुरुदितः प्राचीमुखे चन्द्रमाः ।
येन प्लावयता पुरारिनयनज्वालास्तुषारैः करै-
रुन्मीलत्यधुनापि पुष्पधनुषः साम्राज्यमव्याहतम् ।।३९

अत्र पुनः -

स्वस्थानालोक्य शिशून्नीडनिवृत्ता दिनात्यये विहगाः ।
यच्छन्ति मार्गतरवे कलघोषमिषेण धन्यवादशतम् ।।४०

किञ्च -

निमज्जयन्नेष जगत्समस्तं
किमन्धकारो यमुनाप्रवाहः ।
तन्मध्यभाजः किमु कालियस्य
मार्गप्रदीपा मणयः फणानाम् ।।४१

(अवितर्कं) चलच्चित्रायते खलु निशीथसमयः ।

सकलो नायक एष कोऽपि शशभृत्तस्य प्रभा नायिका
तिमिरौघः प्रतिनायकः प्रतिनवस्तारागणस्तादृशः ।
कृतहासस्तु विदूषकः कुमुदिनीग्रामश्च निर्मापको
विधिरत्र (साश्चर्यं) **प्रतिभान्वितः क्व स कथाकारो**
निलीय स्थितः ।।४२

(सविषादं) हन्त! नीरसः खलु नगरवासः । यत्र -

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

धूमश्रेण्या वियति वहनोद्गीर्णया व्याप्यमाने
प्रायः पूर्णाकृतिरपि शशी दृश्यते यत्नतोऽसौ ।
दृष्टो हर्म्यावलिभिरचिराच्छाद्यते प्रोन्नताभि-
स्ता निस्तीर्य स्पृशति चपलादीपजालेषु दैन्यम् ।।४३

(सविलक्षस्मितम्) अपि च -

शुष्का निष्कुसुमा द्रुमा रतिपतिं निश्शस्त्रमातन्वते
वातः किञ्च कदर्थ्यते मलयजो वाहोत्थया धूम्यया ।
भूम्ना काकरवस्य कोकिलकुहूशब्दोऽपि नाकर्ण्यते
तत्कल्याणपुरे स्थितिर्विरहिणां मन्ये महानुत्सवः ।।४४

इदमप्यपरमस्ति

संलक्ष्यते स्म नगरी या रमणीया पुरा दिनारम्भे ।
कालक्रमेण जाता दुर्जनमैत्रीव सा विरसा ।।४५

(अनुवर्तते....)

❀ नीतिद्विषष्टिका ❀

आलस्यं त्यक्तव्यं लौल्यं लोभः परापवादश्च।
अस्थानेषु च कोपः तथाऽतिमानश्च पुरुषेण।।

சோம்பல், சபலம், ஆசை, பிறரை தூஷிப்பது,
அகாரமணமாகக் கோபித்தல், அதிகமான
அஹங்காரம் இவற்றை மனிதன் விடுதல் வேண்டும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

SATYAM ADVAITAM

Sri. P.R. KANNAN, Mumbai

२०. मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति ।

(ब्रह्मसूत्रभाष्यम्) १-४-४

Perception of the unity of Brahman and individual Atman leads to the removal of false perception. (Brahmasutra Bhashyam 1.4.4)

२१.नावगतब्रह्मात्मभावस्य यथापर्वं संसारित्वं शक्यं दर्शयितुम्।

(ब्रह्मसूत्रभाष्यम्) १-४-४-४

If the unity of Brahman and individual Atman is not perceived, it is possible to perceive the ever changing phenomenal world at every opportunity. (Brahmasutra Bhashyam 1.4.4.4)

२२.प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात्परमेश्वरादन्यो द्रष्टा श्रोता वा । (ब्रह्मसूत्रभाष्यम्) १-१-६-१७

The Supreme Jnana precludes a seer or hearer other than the omniscient Supreme Iswara. (Brahmasutra Bhashyam 1.1.6.17)

२३.वचनादिक्रियाव्यापृतस्यैवात्मनः ब्रह्मत्वं दर्शयति ।

(ब्रह्मसूत्रभाष्यम्) १-१-११-३१

The Brahman-hood of Atman is perceived by the various activities (of body) like speech etc. (Brahmasutra Bhashyam 1.1.11.31)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

२४.नहि जीवो नामात्यन्तभिन्नो ब्रह्मणः।

(ब्रह्मसूत्रभाष्यम्) १-१-११-३१

What is known by the term **Jiva** is not at all different from Brahman. (Brahmasutra Bhashyam 1.1.11.31)

२५.न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति ।

(ब्रह्मसूत्रभाष्यम्) १-२-१-१

When the unity of Atman in all is perceived, attachment (to objects) etc. do not arise. (Brahmasutra Bhashyam 1.2.1.1)

२६. श्रुतिस्तु...परमात्मनोऽन्यं आत्मानं वारयति ।

(ब्रह्मसूत्रभाष्यम्) १-२-१-६

Sruti (Veda)?.. forbids Atman different from Paramatman. (Brahmasutra Bhashyam 1.2.1.6)

२७.गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात्। (ब्रह्मसूत्रभाष्यम्)१-२-१-६

Once the unity of Atman is grasped, all processes like bondage, liberation etc. come to complete end. (Brahmasutra Bhashyam 1.2.1.6)

२८.नहि परस्मादात्मनोऽन्यः कश्चित् आत्मा संसारी विद्यते।

(ब्रह्मसूत्रभाष्यम्) १२-१-८

There exists no Atman subject to cycle of birth and death, different from the Supreme Atman. (Brahmasutra Bhashyam 12.1.8)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

२९.चेतनस्य क्षेत्रज्ञस्याभोक्तृत्वं ब्रह्मस्वभावतां च वक्ष्यामीति।

(ब्रह्मसूत्रभाष्यम्)१-२-४-१२

I shall now tell you about non-enjoyership and the innate nature of Brahman, who is Kshetragna (the knower of kshetra, the field of action), who is verily Consciousness. (Brahmasutra Bhashyam 1.2.4.12)

३०.सर्वं ब्रह्मेति सामानाधिकरण्यं प्रपञ्चप्रविलापनार्थम् ।

(ब्रह्मसूत्रभाष्यम्) १-३-१-१

Concluding that all is Brahman serves the purpose of the annihilation of Prapancha, the created universe. (Brahmasutra Bhashyam 1.3.1.1)

३१.परमात्मनि हि सर्वात्मनि विज्ञाते सर्वमिदं विजातं स्यात् ।

(ब्रह्मसूत्रभाष्यम्) १-३-१-६

Once the Supreme Atman is seen to be the Atman in all beings, all this (creation) comes to be known. (Brahmasutra Bhashyam 1.3.1.6)

३२. यस्तु सर्वशरीरेषूपाधिभिर्विनोपलयते पर एव स भवति ।

(ब्रह्मसूत्रभाष्यम्) १-३-२-७

That, which is hidden inside all bodies without any conditionings, is indeed Supreme. (Brahmasutra Bhashyam 1.3.2.7)

[To be continued....]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

रघुवंशे द्वादशसर्गे त्रिषष्टितमः श्लोकः

निर्वाप्य प्रियसन्देशैः सीतामक्षवधोद्धतः।
स ददाह पुरीं लङ्काम् क्षणसोढारिनिग्रहः।।

पदच्छेदः

निर्वाप्य, प्रियसन्देशैः, सीताम्, अक्षवधोद्धतः, सः, ददाह, पुरीम्, लङ्काम्, क्षणसोढारिनिग्रहः।

शब्दधातुरूपाणि

निर्वाप्य	-	ल्यबन्तमव्ययम्
प्रियसन्देशैः	-	अका. पुं. तृ. बहु.।
सीताम्, लङ्काम्	-	आका. स्त्री. द्वि. एक.।
अक्षवधोद्धतः, क्षणसोढारिनिग्रहः	-	रामशब्दवत्।
सः	-	दका. पुं. प्र. एक।
ददाह	-	ददाह, देहतुः, देहुः - दह - भस्मीकरणे इति धातोः लिटि प्र. पु. एक.।
पुरीम्	-	ईका. स्त्री. द्वि. एक।

प्रतिपदार्थः

सः - அந்த ஹனுமான், प्रियसन्देशैः - அன்பரான ராமரது செய்திகளால், सीताम् - சீதையை, निर्वाप्य - தேற்றி, अक्षवधोद्धतः - அக்ஷகுமாரனைக் கொன்றதால் ஊக்கம் அடைந்தவராய், क्षणसोढारिनिग्रहः - ஒரு கணமே எதிரியின்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

பிணித்தலையுடையவராய், लङ्कां पुरीम् - இலங்கை பட்டணத்தை, ददाह - எரித்தார்.

व्याकरणविशेषाः

प्रियसन्देशैः - प्रियस्य सन्देशाः, तैः।
अक्षवधोद्धतः - अक्षस्य वधः तेन उद्धतः।
क्षणसोढारिनिग्रहः - अरेः निग्रहः अरिनिग्रहः,
क्षणसोढः अरिनिग्रहः येन सः।

कोषः

अरिः - रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृदः।
प्रियः - धवः प्रियः पतिर्भर्ता

भावार्थः

हनूमान् श्रीरामस्य वाचकैः जानकीं सुखयित्वा अक्षकुमारस्य वधञ्चकार। तेन कुपितः मेघनादः ब्रह्मास्त्रेण मारुतिं बबन्ध। तद् बन्धनं किञ्चित्कालं मर्षयित्वा यातुधानदीपितलाङ्गूलः सन् लङ्कां ददाह।

रघुवंशे द्वादशसर्गे चतुष्षष्टितमः श्लोकः

प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत्।।

पदच्छेदः

प्रत्यभिज्ञानरत्नम्, च, रामाय, अदर्शयत्, कृती, हृदयम्, स्वयम्, आयातम्, वैदेह्याः, इव, मूर्तिमत्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शब्दधातुरूपाणि

प्रत्यभिज्ञानरत्नम्, हृदयम्,

स्वयम्, आयातम्	-	अका. नपुं. द्वि. एक।
च, इव, स्वयम्	-	अव्य.
रामाय	-	अका. पुं. चतु. एक।
अदर्शयत्	-	अदर्शयत्, अदर्शयतां, अदर्शयन् - दृशिर् - प्रेक्षणे (णिजन्ते) इति धातोः लङि प्र. पु. एक.।
कृती	-	कृती, कृतिनौ, कृतिनः नका. पुं. प्र. एक।
वैदेह्याः	-	ईका. स्त्री. ष. एक।
मूर्तिमत्	-	मूर्तिमत्, मूर्तिमती, मूर्तिमन्ति तका. नपुं. द्वि. एक।

प्रतिपदार्थः -

कृती - செய்யவேண்டியதை செய்த ஹனுமார், स्वयं - தானே, आयातम् - வெளிவந்ததும், मूर्तिमत् - உருவமுடைய-துமான, वैदेह्याः - சீதையின், हृदयमिव (स्थितम्) - மனம் போலிருப்பதுமான, प्रत्यभिज्ञानरत्नं च - அடையாளமான சூடாமணியை, रामाय - ராமருக்கு, अदर्शयत् - காண்பித்தார்.

व्याकरणविशेषः

प्रत्यभिज्ञानरत्नम् - प्रत्यभिज्ञानञ्च तद्रत्नञ्च। तत्।

भावार्थः

हनूमान् राघवाय सीतायाः चूडामणिं प्रदर्शयामास। तदभिज्ञानं सीतायाः शरीरधारि चित्तमिवासीत्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मन्त्रार्थचिन्तनम् - १९ द्वैमातुरः ऋषिः दीर्घतमाः

Dr. M. JAYARAMAN
Krishnamacharya Yoga Mandiram, Chennai

हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।

ऋग्वेदः १.१६४.२७

सायणभाष्यानुसारि विवरणम्

प्रथमः अर्थः

धेनुः यदा वत्सं प्रति गन्तुं प्रेर्यते, तदा सा मनसि वत्सप्रीतिपूर्णा सती **हिम्** इति शब्दं कुर्वाणा आगच्छति। इयं वसुपत्नी -क्षीरं, दधि, आज्यम् इत्येवमादीन्येव वसुशब्दवाच्यानि। तानि स्वात्मनि बिभर्ति , परिरक्षति एषा। अत इयं वसुपालयित्री। इयम् अघ्न्या च - वधानर्हा। तन्नाम पूजनीया। ईदृशीयं अश्विभ्यां (देवभिषग्भ्यां) हविः प्रदानाय क्षीरं प्रयच्छतु। अस्माकं महत्सौभाग्यसिद्धये वर्धतामियं धेनुः।

द्वितीयः अर्थः

मेघः अपि गोशब्दवाच्यः एव। माता एव। अयं मेघः अपि वत्सवत्पालनीयान् लोकस्य जनान् अभिमुखीकृत्य **हिम्** इति गर्जन् आगच्छति। किञ्च, गवाश्वादिरूपस्य वसुनः, धान्यप्रदसस्यरूपस्य च वसुनः वृष्टिजलद्वारा पालनात्, मेघोऽपि वसुपत्नीशब्दवाच्यः । मेघः अपि अघ्न्य-पदवाच्यः - वधानर्हः। प्रशंसनीयः इत्यर्थः। एषः मेघः अश्विभ्यां देवाभ्यां - तन्नाम - वाय्वादित्याभ्यां वृष्टिं प्रदापयति लोकानां कृते। अयं मेघोऽपि वर्धताम् अस्मदीय-महासौभाग्यसिद्धये।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विवरणम्

अयं मन्त्रः **अस्य वामस्य** इत्युपक्रमवति ऋग्वेदसूक्ते वरीवर्ति। ऋषिणा दीर्घतमसा दृष्टाः मन्त्राः इमे। अयं मन्त्रः प्रकृतेः सहजीविनां च विषये आर्षं चिन्तनं प्रकटयति।

मनसा वत्समिच्छन्ती इत्ययं प्रदप्रयोगः अवधानार्हः। वैदिकाः आर्षाः जनाः धेनुं निजसुखसाधयितृ-प्राणित्वेन न भावितवन्तः। धेनुरपि काचित् माता। तस्यामपि निजवत्साय प्रीतिः भवति इत्येतां तस्याः मातृत्वमानसिकतां ते सूक्ष्मेक्षिकतया विदितवन्तः। आर्षसंस्कृतेः अतिपरिष्कृतत्त्वं सूचयति खल्विदम्? धेनोः अघ्न्यपदप्रयोगः अपि अवलोकनीयः। धेनुकेन्द्रितं यदि कृषिकर्म भवति तदा पर्यावरणस्यापि हितं व्यक्तेरपि हितं सिद्ध्यति इति अधुनिकाः कृषितज्ज्ञाः वदन्ति। अघ्न्यत्त्वप्रदप्रयोगेण धेनोः संरक्षणीयत्त्वं यदिदमाधुनिकैः कथ्यते तदनादिकालात् प्रवृत्ते आर्षवाङ्मये कथितचरं ननु!

धेनुवत् मेघस्यापि अस्मन्मातृत्वमस्ति। धेनोः परिपालवनत् प्रकृतिहितं जीवनं यदि वयं कुर्याम तर्हि मेघरूपिमातापि निजवत्साय क्षीरप्रदात्री गौरिव वृष्टिं तद्वत्सेभ्यः अस्मभ्यं दातुं सदा सिद्धैव।

पर्यावरणसंरक्षणविषये किमस्मात् मन्त्रात् अत्युत्कृष्टतया प्रतिपादनं शक्येत? वेदमाता सर्वत्र चैतन्यं पश्यन्ती पर्यावरणपरिरक्षण-विचारं वात्सल्यभावेन सम्मिश्र्य भोजयति एतन्मन्त्रद्वारा शिशुभ्यः अस्मभ्यम्। किमयं मन्त्रः एतदर्थश्च वेदच्छात्रैरिव आङ्ग्लविद्याभ्यासपरैरपि छात्रैः न मननीयः।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्लोकानुरूपः तिरुक्कुरल्

சான்றாண்மை - शीलम्

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः), नाङ्गुनेरि

கடன்என்ப நல்லவை எல்லாம் கடன்அறிந்து
சான்றாண்மை மேற்கொள் பவர்க்கு..

कर्तव्यज्ञानयुक्तानां सुशीलानां महात्मनाम्।
सत्कार्याणि समस्तानि स्वकर्तव्यानि भूतले।।

குணநலம் சான்றோர் நலனே பிறநலம்
எந்நலத்து உள்ளதூஉம் அன்று.

सुशीलानं हि सद्भावस्तेषां श्रेष्ठगुणाढ्यता।
शारीरसौष्ठवाद्यन्यन्न कल्याणेषु गण्यते।।

அன்புநாண் ஒப்புரவு கண்ணோட்டம் வாய்மையொடு
ஐந்துசால் ஊன்றிய தூண்.

शीलप्रासाददृढता पञ्चस्तम्भाऽऽश्रिता भुवि।
ते प्रेमलज्जालोकोपकारदाक्षिण्यसत्यताः।।

கொல்லா நலத்தது நோன்மை பிறர்தீமை
சொல்லா நலத்தது சால்பு.

तपस्या प्राणिहत्याया अभावेऽस्ति प्रतिष्ठिता।
स्थितः परेषां दोषाणामनुक्तौ शीलसद्गुणः।।

ஆற்றுவார் ஆற்றல் பணிதல் அதுசான்றோர்
மாற்றாரை மாற்றும் படை

कार्यसाधनदक्षाणां नम्रतैव हि दक्षता।
सुशीलानां सैव शस्त्रं परिवर्तयितुं परान्।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

சால்பிற்குக் கட்டளை யாதெனில் தோல்வி
துலையல்லார் கண்ணும் கொளல்.

शीलस्य निकषस्तावदङ्गीकारः पराजितेः।
स्वासमाननरेभ्योऽपि स्वोत्कृष्टेभ्यो यथा तथा।।

இன்னாசெய் தார்க்கும் இனியவே செய்யாக்கால்
என்ன பயத்ததோ சால்பு.

स्वापकारिनरेभ्योऽपि मधुराऽऽचरणं न चेत्।
तर्हि शीलेन किं वा स्यात्प्रयोजनमिहोचितम्।।

இன்மை ஒருவற்கு இனிவன்று சால்பென்னும்
திண்மைஉண் டாகப் பெறின்.

यदि कस्यचिदत्र स्यात् शीलाख्या दृढता तदा।
दारिद्र्यमिह नैव स्यादपमानकरं भुवि।।

ஊழி பெயரினும் தாம்பெயரார் சான்றாண்மைக்கு
ஆழி எனப்படு வார்.

सुशीलाख्यार्णवस्येह वेलाभूता हि सज्जनाः।
साधारणेऽब्धौ क्षुब्धेऽपि भवेयुः सुस्थिराः स्वयम्।।

சான்றவர் சான்றாண்மை குன்றின் இருநிலந்தான்
தாங்காது மன்னோ பொறை.

सुयोग्याश्शीलसम्पन्नाः शीले न्यूनत्वमाप्नुयुः।
यदि तर्हि विशालेयं भूर्भारं सोढुमक्षमा।।

Articles for SAMSKRITASRI can be sent to:
editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रूपकावली - क्रय्यम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

विश्वावसुः सुष्ठु कृतम्। कदाचिन्मार्गनिरोधः सञ्जातः स्यात्। अतो विलम्बमाना इति तर्कयामि। पुनः सर्वं परिशीलयन्तु सर्वे कुत्रापि प्रमादजा न्यूनता भवति वेति।

सर्वे निष्क्रान्ताः।

गृहाभ्यन्तरे ततः प्रविशति सखीभिर्विरच्यमानमण्डना सुलोचना एका सखि। न पुनर्वेणीसंस्कणमपेक्षितम्। स्वयमेव परिष्कृता दृश्यते। तथा हि-

स्वयमेव परिष्करोत्यसौ सहवासाभ्यसनाप्तसंस्कृतिः।
वृषभोऽयमलब्धसूचनो धरते लक्ष्यमिवास्खलद्गतिः।।५

अपराः प्रकृतिरमणीया किलेयमस्मदीया सखी। न चास्याः पुनः परिष्करणमधिकम् अपेक्षितम्। अथवा सकलान्यप्यलङ्करणान्यस्याः अङ्गसंपर्केण द्विगुणीकृतशोभावन्ति लसन्ति।

कटकादीनि महार्घवन्त्यपि ग्लपितभानि कुरूपसङ्गमे।
शिवचूडामुपगम्य शोभते सकलानन्दकरोऽपि चन्द्रमाः।। ६

सुलोचना अलं परिहासेन सखि। यद्येवमप्यङ्गानि किमत्र साध्यते तैः। वस्त्रालयप्रदर्शनपुत्तलिकापदवीमलङ्करोम्यद्य। तत्तदिच्छानुसारेणानीतानां वराणामग्रतः अनुसरणीयाऽस्मि।

तथा हि -

आनीयते खलु महाश्रुतवान्वरो
हि तातेन तत्समगुणी ननु सोदरेण।
मात्रा च वित्तपतिरल्पितवित्तराजः
कन्यामनोरथफलो न हि तेषु लब्धः।।७

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आद्या किमुच्यते त्वया। तव मनोरथपूरणाय किल यतमानाः पितरः। एधमानां पुत्रीं कार्पासमध्यवर्तिनं भस्मान्तरित-मङ्गारमिव धरन्ति गुरवः। प्रतिदिवसमभिवद्रधमान-कुसीदमिव ऋणमाकलय्य सुताभ्यो बिभ्यति।

द्वितीया सुष्ठु भणितमार्यया। कण्टकमिवाङ्घ्रिपरिविद्धं दूरतः परिवर्जयन्ति परिलालनलालिताः प्रतिदिवसोपचीयमानाः कातराः पुत्रीः।

सुलोचना न पुनरत्र पुत्रीमनोरथं पश्यति कोऽपि। अथवा वरमार्गणत्वरापराणामवकाश एव कुत्रेदानीं पुत्रयाः अभिलाषान्वेषणे।

प्रतिमां पश्यति जनः न पुनर्देवमन्तःस्थम्।
विरचितबारूपं न पुनः शीलं गुणञ्च।। ८

आद्या नन्वानीतेषु कोऽपि न सख्याः मनो हरतीति किम्?

सुलोचना तथा नार्थः। पित्रा आनीतः कश्चन महायशस्वी। महाकुलप्रभवः। अहमपि पितुरादेशेन अलङ्कृता स्वामप्रकटयं पुरतः तथा च।

न्यासालङ्करणैर्देहं बद्ध्वाऽस्थां हि वरं पुरः।
प्रतिपाल्य यथाच्छेदं वध्यकाष्ठे अजा तथा।। ९

आद्या ततस्ततः।

सुलोचनाततः पुरतो गुरूणां सञ्जातलज्जः किञ्चिदिवापाङ्ग-परिवर्तनेनावलोकयन्मां पुरावत्र्य मुखं सः पितरमवलोक्य तूष्णीमधो मुखो बभूव।

द्वितीया ततस्ततः।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नीलकण्ठदीक्षितस्य आनन्दसागरस्तवे श्रीदेवीमीनाक्षीमहिमा

Dr.V.SOWMYANARAYANAN,
Assistant Professor & Head, Dept., of Sanskrit,
D.G.Vaishnav College, Arumbakkam, Chennai 600 106.

भूमिका

संस्कृतवाङ्मये स्तोत्रग्रन्थानामाकारा ह्यनन्ता भवन्ति। श्रुति-स्मृति-इतिहास-पुराण-आगमादिषु निस्सरन्ती भक्तिरूपा कीर्तिकलिता स्तुतिभागीरथी महाकाव्यादिकालादारभ्य गीतिकाव्यादिकालपर्यन्त-मविरता अविच्छिन्नरूपतया सांप्रतमपि प्रवहन्ती भासते। अग्नि-इन्द्र-वरुण-सवितृ-रुद्र-मरुत् प्रभृति वैदिकदेवतानां, महाविष्णु-परमशिव-गणपति-कार्तिकेयादि दैवतानां भार्गवी-भवानी-भारतीप्रभृति देवीनां स्तोत्राणां संख्या असंख्येति नात्र शाङ्क्यम्। एतादृशस्तोत्रेषु श्रीमन्नील कण्ठदीक्षिताख्य महाकवेः स्तोत्ररत्नमेकं विलसन्ति आनन्दसागरस्तवो नाम।।

आनन्दसागरस्तवाख्ये स्तोत्रग्रन्थेऽस्मिन् श्रीमद्दीक्षितेन्द्रः श्रीमीनाक्षीदेव्यै चराचरजनन्यै स्वात्मार्पणं शरणागतिरूपेण करोति स्म। श्रीमद्दीक्षितेन्द्रस्य कवित्वं तावत्, तिरुमलैनायकमहाराजेन किमर्थं काकः काक काक इति शब्दायते इति पृष्टेषु सभाकविषु,

सीतेव राम इव क्षमया दयया भुवन इह का कः।
इत्यात्मघोषवचसा तज्ज्ञातीयानां तथैव संज्ञाऽऽसीत्।।

इति श्लोकात्मकोत्तरेणानुमीयते तथा अनुमन्यते च।।

विवरणम्

तमिल्नाडु राष्ट्रे विरिञ्चिपुरसमीपस्थे अडैयपलमिति ग्रामवर्ये श्रीमदाचार्यदीक्षितस्य पौत्राः, श्रीरङ्गराजदीक्षितस्य पुत्राः, श्रीमदप्पय्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दीक्षिताः इति महनीयाः अवतीर्णाः। तेषां कनिष्ठसोदरस्य श्रीमद् आच्चान्दीक्षितस्य पुत्रवर्यः श्रीमन्नारायणदीक्षितः अवततार। तस्य पत्नी श्रीभूमादेवी आसीत्। एतयोः द्वितीयः कुमारः महाकविनीलकण्ठ दीक्षितः। गते षोडशे शताब्दे विजयनगरसाम्राजायं बहुधा प्राप्तभेदमितस्ततः तमिल्नाडुराष्ट्रे मधुरा नगरे तिरुमलैनायकस्य नेतृत्वे एकं प्रतिष्ठामगात्। तस्य सभायां महाकविनीलकण्ठदीक्षितः आस्थानपण्डितस्तथा मन्त्रिवर्यश्च अभवत्। एषः महाकविनीलकण्ठ दीक्षितः स्वस्मिन् शैशवे स्वपितामहस्याग्रजस्य श्रीमदप्पय्यदीक्षितस्य अनुग्रहपात्रभूतोऽभवत्। स्वपितामहस्य ज्येष्ठस्य माहात्म्यमित्थं-

अतिगम्भीरमनाविलमक्षोभ्यमदृष्टपारमविलङ्घ्यम्।
अविरलतरङ्गसङ्कुलमवैमि विज्ञानसागरं महताम्।।

इति वर्णयति। अयं महाकविः बाल्ये एव नलचरितं, गङ्गावतरणमिति काव्यद्वयं ग्रथितवान्। स्वकीये गङ्गावतरणे अमुं विषयमधिकृत्य

कालं जेतुमुपायौ द्वौ कलिकल्मषसंप्लुतम्।
कथा वा निषधेशस्य काशी वा विश्वपाविनी।।

इति श्लोकेन गङ्गां गन्तुं निश्चितवान्, नलचरितरचनं कृतवानिति उल्लिलेख।

महाकविरयं मुकुन्दविलासः, रघुवीरस्तवः, नलचरित्रम्, गङ्गाऽवतरणम्, वैराग्यशतकम्, शिवलीलार्णवम्, नीलकण्ठविजयचम्पूः, सभारञ्जनशतकम्, कलिविडम्बनम्, शिवोत्कर्षमञ्जरी, शिवतत्त्व रहस्यम्, शान्तिविलासः, आनन्दसागरस्तवः इत्यादि महाकाव्य, खण्डकाव्य, चम्पूः, स्तोत्र, कदम्बादि काव्यवैचित्र्येण सहृदयहृदयाह्लादमधुनापि कुर्वन्नस्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एतेषु ग्रन्थेषु आनन्दसागरस्तवः अमुना महाकविना श्रीनीलकण्ठ दीक्षितेन स्वस्य अन्तिमकाले ग्रथितोऽभवत्। कदाचित् तिरुमलैनायकः मधुरापतिः मलयध्वजपाण्ड्यस्य कुमार्याः श्रीमीनाक्षीदेव्याः दिव्यमन्दिरे नूतनमण्डपमेकं प्रतिष्ठापयितुमैच्छत्। तदात्वे शिल्पशास्त्रनिपुणः कश्चित् स्थपतिः मण्डपनिर्माणसमापने महाराजस्य तिरुमलैनायकस्य प्रतिमां तथा तस्य पट्टमहिष्याः प्रतिमां च प्रकल्पनसमये वारं वारं भिन्ना जाता। तेन दुःखितः स्थपतिः नीलकण्ठदीक्षितोक्तेन सामुद्रिका-शास्त्राधारेणैव इत्थं जाता इति ज्ञात्वा समाश्वसितः। एकदा सपत्नीकः तिरुमलैनायकः नूतनमण्डपनिर्माणे शिल्पिनः क्रियाकौशलं दिदृक्षुस्तत्रागतः। पट्टमहिष्याः प्रतिमायां तस्याः ऊरुस्थले वर्तमानं श्वभ्रं दृष्ट्वा चकितः। विचार्यमाणे नीलकण्ठदीक्षितोक्तसामुद्रिका-शास्त्रानुसारं शिल्पिना कृतमित्थमिति ज्ञातवान्। महत्कोपाकुलः महाराजा राजसभां प्रतिनिवृत्य, नीलकण्ठदीक्षितमानय इति भटमेकं प्राहिणोत्। सोऽपि भटः राजाज्ञां शिरसि निधाय नीलकण्ठदीक्षितगृहं प्राप्तवान्। तदात्वे पूजागृहे श्रीमीनाक्षीदेव्याराधनतत्पराय नीलकण्ठदीक्षिताय राजाज्ञा निवेदिता। ज्ञानदृष्ट्या सर्वं ज्ञातेन नीलकण्ठदीक्षितेन तदैव श्रीमीनाक्षीदेव्याराधननीराजनकर्पूरहारत्या स्वदृष्टियुगलहीनता स्वयं कारिता। अनन्तरं, तस्मै भटाय, **राज्ञा दास्यमानं दण्डं स्वयं स्वीकृतवनिति महाराजाय निवेदय** इत्युक्त्वा तं प्रेषयामास। कलिमलेन मोहितं राजानं विचिन्त्य, नीलकण्ठदीक्षितः वारं वारं श्रीमीनाक्षीदेवीं बहुधा प्रणम्य, समर्च्य, **आनन्दसागरस्तवः** इति स्तोत्ररत्नं तदैव विरच्य श्रीमीनाक्षीदेवीं संस्तूय दृष्टिहीनाय स्वस्मै दृष्टिं देहि इति प्रार्थ्य, श्रीमीनाक्षीदेव्याः कृपाकटाक्षेण ईक्षणपुण्यभाग्यमलभत।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एतज्ज्ञात्वा तिरुमलैनायकः भृशं दुःखितः नीलकण्ठस्य सविधे क्षमामयाचत, तथा श्रीमीनाक्षीदेवीमुद्दिश्य स्तवं च कर्तुं प्रार्थयत।

विज्ञापनार्हविरलावसरानवाप्या
मन्दोद्यमे मयि दवीयसि विश्वमातुः।
अव्याजभूतकरुणापवनापविद्धा-
न्यन्तःस्मराम्यहमपाङ्गतरङ्गितानि।।१।।

इति प्रथमश्लोके बाह्यचक्षुरिन्द्रियहीनः महाकविः ज्ञानचक्षुषा श्रीमीनाक्षीदेव्याः अपाङ्गतरङ्गितानि अन्तः स्मरामि इति सूचयति। नवविधभक्तिषु नवमा आत्मनिवेदनमिति शरणागतिः।

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासः गोप्तृत्ववरणं तथा।।
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।।

इति वेदान्तदेशिकस्य वचनानुसारं नीलकण्ठदीक्षितः

आत्मैव भार इति तं त्वयि यो निधत्ते
सोऽङ्गानि कानि कलयत्वलसः प्रपत्तेः।
विश्वत्र सात्र (विश्वस्य साक्षिणि) तु (स)विलक्षणलक्षणा या
विस्रम्भसम्पदियमेव समस्तमङ्गि।।

प्रपत्तेः अङ्गेषु आनुकूल्यसङ्कल्पः तथा प्रातिकूल्यवर्जनमित्यादि हीनः स्वयमलसः भूत्वा, विश्वासमात्रयुक्तः त्वयि आत्मभारं समर्तयामि स्म इति वदति। एतत्पूर्वं, एवं गतस्य मम सांप्रतमेतदर्हं इति शलोके शरणागतेरङ्गं कार्पण्याख्यं निवेदयति। अनन्तरं,

न ज्ञायते मम हितं नितरामुपाये
दीनोऽस्मि देवि समयाचरणाक्षमोऽस्मि।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तत्त्वामनन्यशरणः शरणं प्रपद्ये
मीनाक्षि विश्वजननीं जननीं ममैव।।३२।।

इति श्लोके शरणं प्रपद्ये इति उक्त्वा शरणागतिं विज्ञापयति। किञ्चिन्मया

श्रुतिषु किञ्चिदिवागमेषु शास्त्रेषु
किञ्चिदुपदेशपथेषु किञ्चित्।
आघ्रातमस्ति यदतो भवतीं वरीतुं
गोप्त्रीति काचिदुदपद्यत बुद्धिरेषा।। ३३।।

इत्यस्मिंञ्छ्लोके गोप्त्रीति पदप्रयोगेन गोप्तृत्ववरणाख्यं शरणागतेरन्यतराङ्गं सूचयति। ततः,

ब्रह्मैवमेवमहमेष तदाप्त्युपाय
इत्यागमार्थविधुराः प्रथमे दयार्हाः।
त्वद्रक्षकत्त्वगुणमात्रविदो द्वितीया
इत्यर्थये सदधिकारनिरूपणाय।।३४।।

इति श्लोके कार्पण्यं द्योतयति। मध्ये,

अव्याजसुन्दरमनुत्तरमप्रमेयम्
अप्राकृतं परममङ्गलमङ्घ्रिपद्मम्।
सन्दर्शयेदपि सकृद्भवतीति दयार्द्रा
द्रष्टास्मि केन तदहं तु विलोचनेन।।६१।

इति श्लोके परममङ्गलं तवाङ्घ्रिपद्मं केन विलोचनेन अहं द्रष्टास्मि इति पृष्ट्वा सर्वं द्रष्टुं नेत्रं ददातु इति प्रार्थयति। अन्ते च अन्ते च,

त्वत्सन्निधानरहितो मम माऽस्तु देशः
त्वत्तत्त्वबोधरहिता मम माऽस्तु विद्या।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्वत्पादभक्तिरहितो मम माऽस्तु वंशः
त्वच्चिन्तया विरहितं मम माऽस्तु चायुः।।१०४।।

इति श्लोके देवीमीनाक्ष्यधीनं सर्वं भवतु तद्रहितं माऽस्तु इति प्रार्थयति।

परमावसाने महाकविः दीक्षितः

चतुरध्यायीरूपं कलहंसव्यञ्जनं जगन्मातुः।
अपरब्रह्ममयं वपुरन्तः शशिखण्डमण्डनमुपासे।।१०६।।

वाग्रूपिणीं देवीं तथा अर्थस्वरूपिणं परमेश्वरं तदुभयरूपात्मक-परब्रह्मस्वरूपात्मिकां श्रीमीनाक्षीमुपासे इति हंसपदेन वैराग्यं शशीति चन्द्रपदेन ज्ञानं च द्योतयति। एवं मीनाक्षीदेवीदर्शन-श्रवण-वन्दन-चिन्तन-कीर्तनादि स्वकीये अक्षिणी यथाधिकारं विनियुज्य आनन्दसागरस्तवे स्वयं निमज्य तत्पठितृवक्तृश्रोतॄनपि मज्जयति नीलकण्ठदीक्षितः।।

समापनम्

कण्णप्पनायनारिति स्वभक्ताय नेत्रदानं कृत्वा तं परम शिवोऽन्वगृह्णात्। कूरत्ताल्वार् इति विष्णुभक्ताग्रेसराय नयनदानेन तमनुजग्राह काञ्चीवरदराजः। नीलकण्ठदीक्षिताय नयनप्रदानं कृत्वा श्रीमीनाक्षीदेवी नामसार्थक्यं प्राप। अनेन आनन्दसागरस्तवालोडनेन निमज्जनेन च अस्माभिः ज्ञायते यत् श्रीमीनाक्षीदेवीकृपापात्रा भूत्वा वयं सर्वे संसारसागरात् सन्तारिताः भवेम इत्युक्त्वा,

अप्राकृतीं मृदुलतामविचिन्त्य किञ्चित्
आलम्बितासि पदयोः सुदृढं मया यत्।
तन्मे भवार्णवनिमज्जनकातरस्य
मातः क्षमस्व मधुरेश्वरि बालकृत्यम्।। ५९।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

அஷ்டாங்க ஹ்ருதயம்

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

काले हितं मितं ब्रूयाद् अविसंवादि पेशलम् ।
पूर्वाभिभाषी सुमुखः सुशीलः करुणा-मृदुः ।। २६
नैकः सुखी न सर्वत्र विश्रब्धो न च शङ्कितः ।
न कञ्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम् ।।२७।।
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः ।

काले - தக்க சமயத்தில், हितं - நல்ல, मितं - குறைந்த அளவில், अविसंवादि - எதிர்வாதம் ஏற்படாதவகையில், पेशलम् - மனதிற்கு மகிழ்ச்சியை ஏற்படுத்தும் வகையில், ब्रूयात् - பேசவேண்டும். पूर्वाभिभाषी - தாமாக முன்வந்து இனிமையாகப் பேசவேண்டும். सु-मुखः - மலர்ந்த முகத்துடனும், सुशीलः - நல்லொழுக்கம் உள்ளவனாயும், करुणामृदुः - கருணையுடன் கூடிய மனதுடனும், மென்மையான சுபாவத்துடனும் இருக்கவேண்டும். एकः न सुखी - தனக்கு மட்டும் சுகத்தை அனுபவித்தல் கூடாது. सर्वत्र - எல்லோரிடத்தும், அனைத்து காரியங்களிலும், न विश्रब्धः - நம்பிக்கை வைத்திருக்கக் கூடாது. न शङ्कितः- அதற்காக எந்நேரமும் ஸந்தேஹமும் படலாகாது.

न कञ्चिद् आत्मनः शत्रुं
नात्मानं कस्यचिद् रिपुम् ।। २८

कञ्चिद् - ஒருவரையும், आत्मनः शत्रुं न प्रकाशयेत् - தன்னுடைய எதிரி என்று வெளிப்படுத்துதல் கூடாது. आत्मानं कस्यचिद् रिपुम् - தன்னையும் வேறொருவருடைய எதிரி என்று, न प्रकाशयेत् - வெளிப்படுத்தக் கூடாது. अपमानं न

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रकाशयेत् - தனக்கு ஏற்பட்ட அவமானத்தை வெளியே கூறலாகாது. प्रभोः निःस्नेहतां च - முதலாளியுடைய அன்பு குறைவை, न प्रकाशयेत् - பிறரிடம் வெளிப்படுத்தக் கூடாது.

जनस्याशयमालक्ष्य यो यथा परितुष्यति ।। २८ ।।
तं तथैवानुवर्तेत पराराधन-पण्डितः ।

जनस्य आशयम् - மனிதர்களுடைய மனோநிலையை, आलक्ष्य - நன்றாக புரிந்துகொண்ட பிறகு, यः यथा - எவரொருவர் எவ்வகையிலானால், परितुष्यति - மகிழ்ச்சி அடைகிறாரோ, तं तथा एव - அவருடைய வழியிலேயே, पराराधनपण्डितः - மற்றவர்களை மகிழ்விப்பதில் விருப்பமுடையவனாக இருக்கிறானோ, अनुवर्तेत - அவ்வழியில் நடக்கவேண்டும்.

விளக்கம்:

யாரையும் வருத்தப்படச் செய்யாமல் அனைவரையும் மகிழ்விக்க நினைக்கும் ஒருவர் அம்மனிதர்களுடைய அன்றைய மனோநிலையை நன்கு அறிந்து அவர்களுக்கு மகிழ்ச்சியைத் தரக்கூடிய வகையில் பேசவேண்டும் என்பதே இந்த ஸ்லோகத்தின் கருத்தாகும்.

नीतिद्विषष्टिका

विद्वानृजुः प्रधानः विद्वांश्च शठश्च मध्यमः पुरुषः।
मूर्खऋजुस्तु तृतीयः सर्वजघन्यस्तु मूर्खशठः।।

நேர்மையாக இருப்பவனான வித்வான் முதன்மையானவன். மாயாவியான வித்வான் மத்யமன். மூர்க்கனாயும் நேர்மையாயுமுள்ளவன் அதமன். மூர்க்கனாகவும் மாயாவியுமுள்ளவன் கடைசியானவன்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

करुणामृतम्

(गुरुवायुपुरेशवैभवम् - अनुवर्तते)

तामरश्शेरि शङ्करन् भट्टतिरिकृतम्

पार्श्वे विराजति महद्विनतो गणेश-
स्सम्पूर्णभक्तजनविघ्ननिवारणार्थम्।
प्राप्तुं त्वदीयपरितोषमजस्रमस्मिन्
दासेऽपि तस्य पततात्करुणाकटाक्षः।।

वातालयेश्वर विभो भवदीयमूर्त्त-
वात्सल्यवन्निकटवर्ति तडाकतीरे।
कात्यायनी भवदवाप्तिकृतोद्यमेषु
गोपाङ्गनास्विव पुरा लसति प्रसन्ना।।

माताऽत्मनस्वमिति सत्यमतस्वदीय-
सम्बोधनं कथमहो करणायमित्थम्।
सञ्चिन्तयन्नयन्निव विनिस्सृतमन्दहास-
स्त्वां श्रीपतिं भजति नीरवमत्र शास्ता।।

आनीतमात्मजनकेन विमुक्तचापं
वंशीधरं जनकजारमणं विदित्वा।
भित्तिस्थितस्सततमच्युतमारुतिस्त्वां
संसेवते सकुरुतान्मम भक्तिवृद्धिम्।।

देवेषु भूतनिकरेषु नवग्रहेषु
सर्वेष्वपि प्रकटितेषु चराचरेषु।
भासि त्वमेव भुवनेश्वरभिन्नरूप-
स्तं त्वां भजामि परिपाहि सदाऽपदो माम्।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तेजोमयं तव मुकुन्द तुरीयरूपं
योगीश्वरानुभववेद्यमवर्णनीयम्।
सत्यं तथाऽपि धुरि जाग्रदुदीक्षितं य-
दाकर्षकं प्रियतरं च तदेव मन्ये।।

वातालयेश्वर तुरीयदशा दुरापा
सुप्तिस्तु वृत्तिविलयादवबोधशून्या।
किञ्चार्थयेहमधुना तदम्यतर्षं
स्वप्नेऽपि जाग्रति दिश स्वकदर्शनं मे।।

बालार्कशोभितकिरीडमनेकविद्यु-
न्मालाविभूषमनपेक्षशुभाभिवर्षम्।
भुव्याश्रितप्रकरतापहरं भवन्तं
नव्यावतीर्णमिव दिव्यघनं निषेवे।।

श्रीभूतबल्युदितमोदपरिक्रमं त्वां
सच्छत्रचामरगजोत्तमनीयमानम्।
सामातिरिक्तकरदानरतं च दिव्यां
सम्भारिणीमिव सरूपकृपां नमामि।।

यस्त्वाश्रितं पुलकभूषितमातनोति
साश्रुं सगद्गदगलं गलितान्यचित्तम्।
अस्पृष्टतामपि वायुपुरेश तत्त्वा-
मानन्दपूर्त्तिमिव मूर्त्तिमतीं भजामि।।

(अनुवर्तते....

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

योगरहस्यम् - १८

Prof. S. VENUGOPALAN
SCSVMV, Enathur, Kanchipuram

अस्माकं वैदिकेषु कर्मसु आसनस्य प्राधान्यं महदस्ति। दर्भेष्वासीनाः एव वयं शुद्धाः कर्मानुष्ठानेषु योग्यतां सम्पादयेम। ईश्वरपूजा क्रियते चेदपि षोडशोपचारेषु आसनम् अन्यतमः उपचारः। तत्रैव यत्र ईश्वरविग्रहाराधनं क्रियते तत्रासनस्यापि (पीठम्) पूजा क्रियते। सुखासनम् नाम तत् यत् अस्माकं करिष्यमाणेषु कार्येषु तन्मनत्वसम्पादनाय अत्यन्तम् उपकरोति। आसने असमीचेन शरीरे बाधा जायमाना क्रियमाणे कर्मणि मनसः ऐकाग्र्यं न सम्पादयिष्यति। तेन कर्म कृतमपि अकृतमिव वैयर्थ्यमाप्नोति। ततश्च आसनजयः अधिकरणव्युत्पत्यापि (आस्यते अस्मिन् इति) प्रधानः भवति योगसाधकस्य। तथा यः आसनं सम्यग् बन्धुं समर्थो भवति, तस्य फलतया द्वन्द्वबाधानां द्वारा विमुक्तो न भवति योगाभ्यासविषये। तथा च द्वन्द्वानि कानिचन अस्मान् सर्वदा बाधन्ते, शीतोष्णम्, क्षुत्तृष्णे, सुखदुःखे, लाभालाभे, जयाजये, मानाऽपमाने इति बहूनि द्वन्द्वानि नितरामस्मान् सर्वदा बाधन्ते एव। इमाः बाधाः साधकस्य परिपन्थिन्यः योगसाधनायां उद्युक्तस्य। यावदमीषां जयो न भवेत् तावदस्य प्रगतिरपि निरुद्धा एव। अतश्च आसनजयिनः शीतोष्णादिबाधाः न निरोधिकाः भविष्यन्ति। एवञ्च आसनं जित्वा प्राणान् आयमयितुं/आयन्तुं वा उत्सहमानस्य साधकस्य शरीरं सुतरां सहकरोति तदुपरितनसोपानेष्वपि। तथा च आसनात्परं प्राणायामः चतुर्थमङ्गं सम्पद्यते। प्राणानाम् आयामः = प्राणायामः, प्राणाः आयम्यन्ते यस्मिन् इत्यपि व्युत्पत्तिः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

साध्या एव। **यमो नियमने** इत्यस्माद्धातोः निष्पन्नः घञन्तः आ इत्युपसर्गपूर्वकः आयामशब्दः। तत्र सूत्रम् तस्मिन् सति **श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः** इति। (यो.सू. २.४९)। श्वासो नाम प्राणः यद्बाह्यं वायुम् आयामति सः उच्छ्वास एव। प्रश्वासो नाम स एव प्राणः यदा कौष्टुयं वायुं निःश्वसिति स निःश्वासरूपः।। तत्र प्रधानतया आदौ निःश्वासः ततः पूरणात्मकः उच्छ्वासः तदनु अन्तः एव आयान्तस्य प्राणस्य धारणरूपः कुम्भकः इति त्रिविधः प्रयासः प्राणायामे वर्तते। एषु त्रिषु अपि प्रयत्नेषु श्वासप्रश्वासयोः गतिविच्छेदः विद्यते एव। प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगस्य सम्भवः इति वचनम् अस्य प्राणायामस्य बहुफलकस्य प्रधानतया अस्माकं सामान्यानां यदारोग्यमावश्यकं, तस्य प्रदाने सामर्थ्यं सूचयति। हठयोगप्रदीपिकायां आसनप्राणायामविषये विशेषतया विचारः विद्यते। स सर्वोऽपि अस्माभिर्ज्ञातव्य एव। आरोग्यकामानाम्, आयुष्यकामानां, मनोनिग्रहकाङ्क्षिणां आत्मनो मोक्षार्थं यतमानानामिति सर्वेषामपि प्राणायामेन लाभः भवति। विभिन्नप्रक्रियायुक्ताः समन्त्रकाः, अमन्त्रकाः च प्राणायामाः अस्माभिः समाजे अभ्यस्यन्ते।

❀ नीतिद्विषष्टिका ❀

सुजनो न याति वैरं परहितबुद्धिविनाशकालेऽपि।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य।।

ஸஜ்ஜனங்களின் போக்கு - விரோதத்தையடையவே மாட்டார். தான் நசிக்கும் போதும் பிறருக்கு நன்மையே நாடுவார். பாருங்கள், சந்தன மரம் வெட்டும்போதும் தன்னை வெட்டும் கோடரி முனையை வாசனையுள்ளதாகச் செய்யும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

माद्रीसुतौ पुष्पफले समृद्धे

Dr. M. VINOTH
French Institute of Pondicherry,

भारतं पञ्चमो वेदः इति ह्यभियुक्तोक्तिः। रामायणमहाभारताख्यौ द्वौ इतिहासौ भारतदेशस्यास्य नेत्रसमानौ भवतः। न केवलं भगवदवतारम् उत कौरवपाण्डवादीनाम् इतिहासं वर्णयत इमावितिहासौ। किं तर्हि इति पृष्टे- इमौ धार्मिकग्रन्थौ इति कथने न कस्यचिद् विप्रतिपत्तिः। तथ्यमेवेदं वचनम्। वाल्मीकिमहर्षिणा प्रणीते आदिकाव्याख्ये श्रीमद्रामायणे, पञ्चमवेदत्वेन गण्यमाने भगवता व्यासेन प्रणीते महाभारते च न केवलं रामस्य कृष्णस्य उत अन्यस्य लीलादिकं कथाचरित्रादिकं वा वर्ण्यते किन्तु तैः तैः चरित्रैः ताभिः ताभिः कथाभिः सह आदर्शजीवनं कथं भवेत् कथं न भवेदिति, धर्मस्य परिपालने किमाप्नुमः, धर्मस्य व्यतिक्रमे च किमाप्नुम इत्येते जीवनोपयोगिनः विषयाः उद्बोधिताः वर्तन्ते। न केवलमेतदपि तु एकैकस्य जनस्य दृष्टिपथे इमौ ग्रन्थौ एकैकं नवांशं बोधयतः। यथा- भक्तः कश्चिद् यदि इमौ ग्रन्थौ पठेत् तर्हि चरित्रदृष्टिं विधाय **एकैकमक्षरं पुण्यं महापातकनाशनम्** इतिवत् पठेत्। दार्शनिकः यदि पठेत् तर्हि तत्र निहितं दार्शनिकांशं सुष्ठु ज्ञातुं प्रयतते। वेदान्ती कश्चिद् यदि पठेत् तर्हि वेदान्तांशान् अध्येतुं प्रयतते। तथैव हि वैयाकरणः कश्चिद् ग्रन्थाविमौ व्याकरणदृष्ट्या अध्येतुं प्रयतते तर्हि बहून् नवांशान् व्याकरणांशांश्च ज्ञातुं प्रभवति। एवं सर्वेषामपि पाठकानां तत्तच्छास्त्रसंबद्धविषयान् बोधयतः इमौ इतिहासौ। तादृशयोः इतिहासयोः मध्ये महाभारते पूर्वोक्तं कञ्चनांशं जानीमः। आदिपर्वणः अनुक्रमणिकपर्वणि प्रथमे अध्याये विद्यते श्लोकोऽयम्-

युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोर्जुनो भीमसेनोऽस्य शाखाः।
माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(महाभारतम्, आदिपर्व, अनुक्रमणिकपर्व, १.१११)

पद्यस्य अस्य समान्यार्थस्तु - चरित्रेऽस्मिन् युधिष्ठिरः धर्ममयः महाद्रुमः महान् वृक्षः इत्यर्थः। अर्जुनश्चास्य वृक्षस्य स्कन्ध इव वर्तते। भीमसेनः अस्य शाखा इव। माद्रीसुतौ नकुलसहदेवौ पुष्पफले इव भवतः। एतादृशस्य वृक्षस्य मूलं तु साक्षात् परमात्मरूपः भगवान् श्रीकृष्णः। अस्त्वेतावता। अधुना एकैकस्य अध्येतुः एकैकमंशं बोधयति ग्रन्थोऽयम् इति यदुक्तं पूर्वं तद्रीत्या आलोचनेन श्लोकेऽस्मिन् कश्चन वेदान्तांशः कश्चन व्याकरणांशश्च निहितौ वर्तेते इति ज्ञायते। तौ च कौ इति ईषत्पश्यामः।

आदौ वेदान्तांशः- धर्ममयो महाद्रुमः इत्यनेन धर्मो नाम पुण्यं तदेव च महाद्रुमः इति वर्णितः। यथा अर्जुनादयः युधिष्ठिरैकात्मानः तथा धर्मैकात्मानः शम-दम-सत्य-अहिंसादयः अस्य महाद्रुमस्य स्कन्धशाखापुष्पफलानि भवन्ति। मूलञ्च अस्य वृक्षस्य परमात्मरूपं तत्त्वज्ञानम्। तदेव च ब्रह्मशब्देन उपात्तः यतः ज्ञानस्य मूलं ब्रह्मदेवः वेदात् हि योगिकत्वाख्यं परापरधर्मज्ञानं जायते। वेदस्यापि मूलं ब्राह्मणाः तत्संप्रदायप्रवर्तकत्वात्। तथा च वेदब्राह्मणभक्तेन संपाद्यमानः वेदोक्तः योगादिधर्मवृक्षः अहिंसासत्यादिस्कन्धः धारणाध्यानादिशाखः तत्त्वसाक्षात्कारफलः पुरुषार्थकामेन भगवदाराधनबलेन संपादनीय इति वेदान्तांशः कश्चन निहितः भगवता व्यासेन श्लोकेऽस्मिन्।

अपरश्च कश्चन व्याकरणशास्त्रसंबद्धः शास्त्रीयांशः वर्तते। द्वितीयार्धे माद्रीसुतौ इति श्रूयते यश्च शब्दः नकुलसहदेवयोः निर्देशाय प्रयुक्तः। माद्र्याः सुतौ माद्रीसुतौ इति विग्रहः। माद्रीशब्दार्थस्तु मद्रस्य (क्षत्रियस्य) अपत्यं स्त्री इति। वस्तुतोऽत्र **द्यञ्मगधलिङ्गसूरमसादण्** (अष्टाध्यायी ४.१.१७०) इत्यनेन सूत्रेण मद्रशब्दादण् प्रत्ययः, स च तद्राजसंज्ञकः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ततश्च तस्य **अतश्च** (अष्टाध्यायी ४.१.१७७) इत्यनेन सूत्रेण स्त्रियां वर्तमानस्य तद्राजस्य अकारप्रत्ययस्य लुकि मद्र इति जाते जातिवाचिनः स्त्रियां ङीषि, मद्री इति जाते, तस्मात् सुप्रत्यये तस्य च लोपे मद्री इति रूपम्। अयमेव च मद्री इति मकारोत्तर-अकारघटकः शब्दः स्त्र्यपत्यार्थप्रतिपादकः यश्च शास्त्रनिष्पन्नः। परं भगवता व्यासेन माद्रीसुतौ इति आकरघटकः शब्दः प्रयुक्तः तस्य का गतिरिति सन्देहो जायते। अत्र केचित्- वृद्धिसहितं रूपं तु स्वच्छन्दवाचः ऋषयः इति समाधेयम् इति वदन्ति। परमस्मिन् प्रसङ्गे आचार्यः भट्टोजिदीक्षितः स्वीयसिद्धान्तकौमुद्याम् अस्य सूत्रस्य वृत्तौ ह्रस्व एव पाठः इति हरदत्तः इत्येकं समाधानं दत्त्वा, **अग्रे भर्गादित्वं वा कल्प्यम्** इत्यन्यदपि समाधानम् ददौ। प्रथमं समाधानं त्ववगन्तुं शक्यं ह्रस्व एव पाठ उचित इति। द्वितीयं किमिदं भर्गादित्वं वा इति चेदुच्यते- अतश्च इति सूत्रानन्तरं **न प्राच्यभर्गादियौधेयादिभ्यः** (अष्टाध्यायी ४.१.१७८) इत्यनेन सूत्रेण प्राच्येभ्यः, भर्गादिभ्यः, यौधेयादिभ्यश्च तद्राजस्य अकारप्रत्ययस्य न लुक् इति विधीयते। तत्सूत्रं मनसि निधाय तत्र च यः गणः वर्तते भर्गादिः, तस्मिन् गणे अस्य मद्रशब्दस्य पाठः कल्प्यः, येन तद्राजस्य अलुकि, अण्प्रत्ययस्थणित्वं पुरस्कृत्य आदिवृद्धिः संभवति। ततश्च माद्री इति वृद्धिघटकं रूपं जायेत इति। कोऽयं भर्गादिरिति चेत्- भर्ग, करूश, केकय, कश्मीर, साल्व, सुस्थाल, उरस्, कौरव्य इत्येते। अत एव तद्देशसामीप्यान्मद्रस्यापि तत्र पाठे संभवत्येवायं प्रयोगः माद्रीसुतौ इति। इयान्तं महान्तं व्याकरणांशं बोधयितुमेव भगवता व्यासेन माद्रीसुतौ पुष्पफले समृद्धे इति निर्दिष्टस्स्यात्। एवं तत्र तत्र इतिहासयोः निहितमंशं ज्ञातुं प्रयतामहे यदि, तर्हि नूनं नवं नवं शास्त्रज्ञानं प्राप्नुमः।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुक्तमौक्तिकम् - १२

Sri. SUNDARARAJAN, Retd. IAS

दुर्दान्तो रावणो गजः

कशयाऽयमवश्यस्तु दुर्दान्तो रावणो गजः।
वशया सीतयाऽवश्यं अवशी वशमीयिवान्।।

स दानवस्स्यात् निधनी निदानतः

धनी वदान्योऽन्यजनाय दानवान्
मृतस्सुवर्गं गमितो महीयते।
धनी बतान्यः कृपणस्त्वदानवान्
स दानवस्स्यात् निधनी निदानतः।।

जगन्नाथो देवो जयति नितरां वत्सल इतः

जगन्नाथो देवो जयति नितरां वत्सल इतः
सुभद्रा पार्श्वस्थस्सहज बलभद्रेण सहितः।
स्वयं दूरे न्यस्य स्वकरविधृतं चक्रमनिशं
अपक्ष्म क्षेप्स्यन् स्वं नयनयुगमस्माकमुपरि।।

प्रपन्नमेनं कुरु मा विपन्नम्

आपन्नमासन्नविपत्तिखिन्नं प्रपन्नमेनं कुरु मा विपन्नम्।
स्मर त्वरावान् उपगम्य तिम्याक्रान्तं हि दन्तावलमप्यरक्षः।।

विभीषणेऽदात् भुवनावनाय

भूत्वोत्तरस्यां दिशि चक्रवर्त्ती रामस्वमूर्त्तेः प्रतिमूर्त्तिभूतम्।
स दक्षिणस्यां दिशि रङ्गनाथं विभीषणेऽदात् भुवनावनाय।।

महारथी वेङ्कटनाथ एकः

रथाग्रगो नाथरथो गरुद्मान् स्वयं रथान्तः सरथाङ्गपाणिः।
रथस्य पार्थस्य पथस्स नेता महारथी वेङ्कटनाथ एकः।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्रिविधमौषधम् - ६

Sri.S.BALASUBRAMANIAN
Ms. B. RENGA PADMINI
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नाडीविषये पूर्वमासे वयं दृष्टवन्तः। इतः षट्चक्राणां विषये विस्तरेण पश्यामः।

षट् इति संख्याविशेषः। षडेव चक्राणि भवन्ति। चक्रशब्दं विशिष्टरूपशक्तिं दर्शयति। प्रत्येकं चक्रस्य विशिष्टं स्वरूपं तथा प्रभावः भवति। मन्त्रोच्चारणसमये मन्त्रस्य वीर्यं द्विसप्ततिसहस्रनाडीभिः तथा षट्चक्रैः (मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यैः) सर्वं शरीरं प्राप्य स्वं कर्म कुरुते इति वयम् अपश्याम। षट् चक्राणि द्विसप्ततिसहस्रनाडीभिः इडापिंगलयोर्मद्ध्ये प्रधानायां सुषुम्नाख्यां नाड्यां समाश्रितानि भवन्ति। वाचस्पत्ये एवमुक्तम् -

योगोपयोगितया देहस्थमूलाधारादिचक्रनिरूपणाय इडादिनाडी-निवेशनोक्तिपूर्व्विका चक्रभेदोक्तिः तन्त्रसारे - गौतम उवाच।

देवर्षे! योगयुक्तानां योगानुभवदर्शक!।
सांख्ययोगविशेषज्ञ! कर्म्मयोगनिषेधक!
विना योगं न सिध्येत्तु कुण्डलीचङ्क्रमः प्रभो!।
मूलपद्मे कुण्डलिनी यावन्निद्रायिता प्रभो!।
तावत्किञ्चिन्न सिध्येत मन्त्रयन्त्रार्च्चनादिकम्।
जागर्त्ति यदि सा देवी बहुभिः पुण्यसञ्चयैः।
तदा प्रसादमायान्ति मन्त्रयन्त्रार्च्चनादयः।
शिववद्विहरेल्लोके षडैश्वर्य्यसमन्वितः।
योगयोगाद्भवेन्मुक्तिर्म्मन्त्रसिद्धिरनुत्तमा।
सिद्धे मन्त्रे परावाप्तिरिति-शास्त्रेषु निर्णयः।
तस्मात् कार्य्यं परं योगं कथयस्वमुनीश्वर!।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुक्तात्मा येन विहरेत्स्वर्गे मर्त्येरसातले।
जीवन्मुक्तश्च देहान्ते निर्व्वाणपदमाप्नुयात्।। इति।।

शरीरस्थषट्चक्राणि यथा मूलाधारः, स्वाधिष्ठानम्, मणिपूरम्, अनाहतम्, विशुद्धम्, आज्ञाख्यम् च। प्रतिचक्रविषयं विस्तरेण पश्यामः।

१ मूलाधारचक्रम्

शब्दकल्पद्रुमे - **मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।**
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ।।
तदूर्द्धे कामबीजन्तु कलशान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ।।
तद्वाह्ये हेमवर्णाभं वसवर्णचतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ।।

मूलाधारचक्रं योनिप्रदेशे स्थितम् । घ्राणस्य गुदस्य च अधिकरणं करोति। कुण्डलीनीशक्तिम् अत्र आवृत्य तिष्ठति। अस्य चक्रस्य बीजाक्षराणि वं शं षं सं भवन्ति। मूलाधारचक्रं ध्यानेन शक्तियुक्तं क्रियते। इदं चक्रं परुषस्य शरीरकान्तिं तथा आरोग्यम् अभिवृद्धयति। अस्य अभ्यासी मनुष्यः मन्त्रसिद्धिमपि सम्यक् प्राप्नोति। समाग्निं च अवाप्नोति। सर्वविद्यावान् सः पुरुषः भवति। तस्य चित्तस्य आनन्दः भवति।

२ स्वाधिष्ठानचक्रं

तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
बादिलान्तषडर्णेन युक्ताधिष्ठानसंज्ञकम् ।।
मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः।।

स्वाधिष्ठानचक्रं लिङ्गमूले स्थितः। रसनेन्द्रियं तथा उपस्थाधिकरणं करोति। अस्य चक्रस्य बीजाक्षराणि बं भं मं यं रं लं चेति । ध्यानाभ्यासेन यस्य एतत् चक्रं जागृतं स्यात्, सः पुरुषः योगीणां श्रेष्ठः भवति, मोहाहङ्काररहितश्च।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३ मणिपूरचक्रम्

तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ।।
मणिवद्भिन्नतत्पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।।
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम्।

मणिपूरचक्रं नाभिप्रदेशे तिष्ठति। नेत्रयोः तथा पादयोः अधिकरणं करोति। तस्य बीजाक्षराणि डं ढं णं तं थं दं धं नं पं फं चेति । ध्यानेन जागरितमेतत् चक्रं यस्य, सः निरन्तरसुखं, परदेहप्रवेशनशक्तिं, वाक्सिद्धिं च प्राप्नोति।

४ आनाहतचक्रम्

तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।।
कादिठान्ताक्षरैरर्कपत्रश्च समधिष्ठितम् ।
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ।
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम् ।।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ।

अनाहतचक्रं हृदि प्रदेशे स्थितं। त्वचः तथा हस्तयोः अधिकरणं करोति। कं खं गं घं ङं चं छं जं झं ञं टं ठं अस्य बीजाक्षराणि भवन्ति। यस्यैतच्चक्रं ध्यानाभ्यासेन जागरितं, सः ज्ञानशक्तिं, दूरश्रुतिं, दूरदृष्टिं चाप्नोति। सः स्वेच्छया स्वगतिं व्रजेत्।

५ विशुद्धचक्रम्

तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।।
स्वरैः षोडशकैर्युक्तं धूम्रवर्णैर्महाप्रभम् ।
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात् ।।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विशुद्धचक्रं कण्ठप्रदेशे समाश्रितम्। श्रोत्रस्य वचष्टा अधिकरणं करोति। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः अस्य बीजाक्षराणि भवन्ति। यस्यैतत् चक्रं जागरितं, सः पूर्वोक्तगुणैर्युक्तः त्रिकालज्ञश्च भवति।

६ आज्ञाचक्रम्

आज्ञाचक्रं तदूर्द्ध्वे त्वात्मनाधिष्ठितं परम् ।।
आज्ञासङ्क्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ।

आज्ञाचक्रं भ्रुवोर्मध्ये समाश्रितम्। तस्य रूपं श्वेतं तथा द्विदलान्वितम्। हं तथा क्षं अस्य बीजाक्षरे भवतः।

ध्यानशक्त्या यस्यैतत् चक्रं जागृतं सः वाक्सिद्धिमवाप्नुयात्।

केचित् आज्ञाचक्रोपरि सहस्रचक्रं वदन्ति। कुण्डलिनीशक्तिः अस्य चक्रस्य अन्तःप्रवेशनात् पुरुषस्य मोक्षम् आपादयति।

षट् चक्राणि सर्वाभ्यो नाडीभ्यो प्रधानतमासु मध्यनाडीषु तिष्ठन्ति। सुषुम्नानाडी मूलाधारादारभ्य ब्रह्मरन्ध्रं यावत् गच्छति। सुषुम्ना स्थिरा भवति। सर्पवत्सरन्ती कुण्डलिनीशक्तिः मूलाधारचक्रमसीपे सुषुम्नया रुद्धा तिष्ठति।

प्राणः इडायां पिङ्गलायां च समानः एव। कुण्डिलिनीशक्तिरेव सुषुम्नां प्रविशति। सैव ततः सहस्राख्यं चक्रं प्राप्य मोक्षाय कल्पते। इह मन्त्रस्य वीर्यमपि श्रीगौतमवचनप्रकारे फलं ददाति।

कश्चित् विषयम् एतेन सिद्धान्तेन ज्ञातुं शक्नुमः। दैवव्यपाश्रयचिकित्सायां मन्त्रप्रयोगः रोगिणां रोगनाशनार्थमपि सामान्येन उक्तः। परन्तु स्वस्थानां पुरुषाणां तस्य एव मन्त्रोपायस्य मोक्षार्थम् उपयोगं कर्तुं शक्नुमः।।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शब्दविमर्शः - ८ डुकृञ् धातोरनेकार्थकप्रयोगाः

Dr. V. R. MANOJ
Chinmaya International Foundation, Veliyannad, Kerala

कृतौ करोति - कुरुते। [to do, act, perform, work-out etc.]

कृतिः प्रयत्नः। कृञ् धातुः। आङ्गान्यननङ्गः प्रमदाजनस्य करोति लावण्यससम्भ्रमाणीति कालिदासः (ऋतु.६.९)। सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनमिति भारविः (किरा.२.३३) क्षान्तौ अधिकुरुते। [to endure, bear with, put up with, survive, sustain, be patient, tolerate, undergo, withstand etc.]

क्षान्तिस्तितिक्षेत्यमरः। अधिपूर्वः कृञ् धातुः। अधेः प्रसहने (१.३.३३) इत्यात्मनेपदम्। अभिभवेऽर्थे अधिकुरुते इति पूर्वमुक्तम्। गर्वेऽर्थे अहङ्करोति - अहङ्कुरुते। [to be arrogant, be conceited, be egoistic, be in self-admiration, be in self-love, be proud etc.]

गर्वोऽभिमानोऽहङ्कार इत्यमरः। अहम्पूर्वः कृञ् धातुः। अहम्बुद्धिं करोतीत्यर्थः। अहमिति विभक्तिप्रतिरूपकं मान्तमव्ययम्। जिघांसने अपकरोति - अपकुरुते। [to bear malice or hatred, hurt, injure, kill.]

हन्तुमिच्छा जिघांसा। अपपूर्वः कृञ् धातुः। तक्षणेऽर्थे तनूकरोति - तनूकुरुते। [to carry out wood-work, carve, cut, do carpentry, do joinery, sculpt, shape, slice etc.]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तनु विस्तारे (तना.१४६४) इत्यस्मात् अर्तिपृवपियजितनिधनितपिभ्यो नित् (उणा.२.२८२) इत्युसिः। तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे इति विश्वमेदिन्याबुद्धरति रामाश्रमी। तनुशब्दपूर्वः कृञ् धातुः।। अतनुस्तनुः सम्पद्यमानं करोतीत्यर्थे तनुशब्दादभूततद्भावे इत्यनुवर्तमाने कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः (५.४.५०) इति च्विप्रत्यये च्वौ च (७.४.२६) इत्यङ्गस्य उकारस्य दीर्घः।

त्रिः कृषौ तृतीयाकरोति - तृतीयाकुरुते। त्रिगुणाकरोति - त्रिगुणाकुरुते। [to plough for the third time]

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्नित्यमरः। तृतीयं कर्षणं करोतीत्यर्थः। त्रिशब्दात् त्रयाणां पूरण इत्यर्थे त्रेः सम्प्रसारणञ्च (५.२.५५) इति तीयप्रत्ययः त्रिशब्दस्य च सम्प्रसारणम्। तृतीयशब्दात् कृञ्धातौ परे कृञो द्वितीयतृतीयशम्बबीजात्कृषौ (५.४.५८) इति तृतीयशब्दात् डाच्प्रत्यये अनुबन्धलोपे तृतीया इत्यस्मात्परः कृञ्। त्रिगुणाकरोति - त्रिगुणाकुरुते इत्यत्र त्रिगुणशब्दात् कृञ् धातौ परे सङ्ख्याया श्च गुणान्तायाः (५.४.५९) इति डाच्प्रत्यये अनबन्धलोपे त्रिगुणा इत्यस्मात्परः कृञ्।

द्विः कृषौ द्वितीयाकरोति - द्वितीयाकुरुते। शम्बाकरोति - शम्बाकुरुते। द्विगुणाकरोति - द्विगुणाकुरुते। [to plough the second time]

द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीहेत्यमरः। द्वितीयं कर्षणं करोतीत्यर्थः। द्वितीयाकरोति - द्वितीयाकुरुते इत्यत्र द्वितीयं कर्षणं करोतीत्यर्थः। द्विशब्दात् द्वयोः पूरण इत्यर्ते द्वेस्तीयः (५.२.५४)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इति तीयादेशः। द्वितीयशब्दात् कृञ् धातौ परे कृञो द्वितीयतृतीय-शम्बबीजात्कृषौ (५.४.५८) इति द्वितीयशब्दात् डाच्प्रत्यये अनुबन्धलोपे द्वितीया इतयस्मात्परः कृञ्। शम्बाकरोति - शम्बाकुरुते इत्यत्र शमिति मकारान्तः सुखवाचकः। तस्मात् कंशम्भ्यां बभयुस्तितुतयसः (५.२.१३८) इति बः प्रत्ययः। शम्बशब्दस्यात्र प्रातिलोम्ये वृत्तिः कृञश्च कर्षणे इति प्रकृतसूत्रपदमञ्जर्याम्। अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषतीत्यर्थः। शम्बशब्दपूर्वः कृञ् धातुः। प्राग्वत् कृञो द्वितीयतृतीयशम्बबीजात्कृषौ (५.४.५८) इति शम्बशब्दात् डाच्। द्विगुणाकरोति - द्विगुणाकुरुते इत्यत्र द्विगुणशब्दात् परः कृञ्। सङ्ख्यायाश्च गुणान्तायाः (५.४.५९) इति डाच्। शेषं प्राग्वत्। निन्दायाम् अपकरोति। [to blame, abuse, censure, condemn, criticize, dishonor etc.]

अवर्णाक्षेपनिर्वादपरीवादापवादवत्। उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे इत्यमरः। अपपूर्वः कृञ् धातुः। निराकृतौ अपाकरोति - अपाकुरुते। पराकरोति। [to ban, bar, debar, decline, dismiss, disregard, exclude, forbid etc.]

प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः इत्यमरः। अपाकरोति - अपाकुरुते इत्यत्र अप आङ् इत्युपसर्गद्वयपूर्वः कृञ् धातुः। गन्धनावक्षेपण (१.३.३२) इत्यादिना आत्मनेपदम्। उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्र इति कालिदासः (शाकु.६.३०)। पराकरोतीत्यत्र परापूर्वः कृञ् धातुः। अनुपराभ्यां कृञः (१.३.७९) इति परस्मैपदम्।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शास्त्रं ज्योतिः प्रकाशार्थम् - २

Ms. DHWANI J.

IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नमः संस्कृतसेवकेभ्यः ! गतमासे, पठ्यं ग्रन्थं चेतुं चरकोक्तो मार्गो दृष्टः। उपायोऽयम् आयुर्वेदग्रन्थे चरकसंहिताख्ये विमानस्थाने-ऽष्टमाध्याये वर्णितो वर्तते। तत्र शास्त्रलक्षणनाभिधानानन्तरं वर्णितविषया अप्यतीव रोचका विचारणीयाश्च भवन्ति। तस्माद्बृहद्विचारभाण्डागारा-ल्लघुभागोऽत्राधुना चर्च्यते। शास्त्रलक्षणकथनादनु इदं वाक्यमुच्यते-

ततोऽनन्तरमाचार्यं परीक्षेत; तद्यथा- पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनसमर्थं चेति। **एवङ्गुणो ह्याचार्यः सुक्षेत्रमार्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति** (चरकसंहिता - विमानस्थानम् - ८.४)

ग्रन्थे तु वाक्यमिदं भिषग्बुभूषुविषये उच्यते। भिषग्बुभूषुः आदौ भिषजां नैकेषु शास्त्रेषु स्वीयपठनार्थं शास्त्रचयनं कुर्यात्, ततश्च आचार्यं परीक्षेतेत्युक्तम्। यथैव चरके भिषक्शास्त्रचयनोक्तमार्गो न केवलम् आयुर्वेदेन सह प्रसक्तिमेति, अपि च सर्वेषु ज्ञानक्षेत्रेषु शास्त्रचयनार्थमुपयोगाय कल्पते इत्यस्माभिर्गतमासे चर्चितं, तथैव उपरि लिखितमिदमपि वाक्यं सर्वशास्त्रप्रसक्तं तिष्ठति। सर्वत्र अध्ययनार्थम् आचार्यलक्षणानि वर्णयदिदं वाक्यमधुना पदशः विचार्यते।

ततोऽनन्तरमिति शास्त्रचयनानन्तरम्। आचार्यं परीक्षेत इत्यादि। तत्रादौ को नामाचार्य इति जिज्ञास्यते। उच्यते हि याज्ञवल्क्यस्मृतौ-

आचिनोति च शास्त्रार्थानाचारे स्थापयत्यपि ।
स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते ।। (याज्ञवल्क्यस्मृतिः)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यः शास्त्रार्थान् सम्यक् ज्ञात्वा, तानेव शास्त्रार्थान् स्वीयजीवनेऽभ्यासरूपेणावतारयति, तान् शास्त्रार्थानरपरानपि बोधयति, सः आचार्यः इति उच्यते।

ईदृक्ष्वप्याचार्येषु कः श्रेय इति चरकेणात्रोच्यते - पर्यवदातश्रुतमित्यादि। तत्रादौ पर्यवदातश्रुतमिति। परि-अव-उपसर्गयोः दैप् (दै) शोधने इति धातोः क्तप्रत्ययोगात् पर्यवदातशब्दः। अतः परिपूर्णरूपेण विशुद्धं ज्ञानं येन श्रुतं, सः पर्यवदातश्रुतः। पर्यवदातश्रुतं सर्वतो निर्मलज्ञानश्रुतम्। परिदृष्टकर्माणं सर्वतः स्वक्षेत्रे क्रियमाणानि कर्माणि दृष्टं येन, तं, ग्रान्थिकज्ञानमतिक्रम्य लिखितज्ञानस्य साक्षात्कारेऽपि समर्थमिति यावत्। दक्षम् अवामबुद्धिमिति व्याख्याकारः चक्रपाणिः। अदुष्टबुद्धिं शुद्धबुद्धिमिति यावत्। दक्षिणमिति। दक्ष् वृद्धौ इति धातोः इनन्प्रत्ययोगात् दक्षिणशब्दः। अतो दक्षिणमिति वर्धमानम्। यः आचार्य्यत्वप्राप्त्यर्थज्ञानयुक्तोऽपि सन् सर्वज्ञानदेभ्यः ज्ञानं स्वीकर्तुं क्षमः भवति, सोऽत्र दक्षिणशब्देन गृह्यते। शुचिं कायवाङ्मनश्शुद्धम्। शुच्यति अनेनेति शुचिः इति शब्दकल्पद्रुमः। अतः न केवलं यः शुद्धः, अपि तु यस्य शुद्धत्वेन अपरेऽपि शुद्धत्वं प्रति प्रेरिता भूत्वा शुद्ध्युः, सः शुचिरुच्यते। तं शुचिम्। जितहस्तं कर्मकरणवेलायाम् अकम्पमानहस्तं, चित्तोक्तदिशा कार्यं क्रियमाणौ हस्तौ यस्य, तम्। उपकरणवन्तमिति पदं विव्रियता व्याख्याकारेण चक्रपाणिना लिख्यते - **अनुपकरणे गुरौ चिकित्सावृत्त्यभावात् कर्मदर्शनं न भवति** इति। ननु चिकित्साप्रसङ्गे चिकित्सानिमित्तानि उपकरणानि द्रव्याद्रव्यभूतानि औषधादीनि विना न साधु चिकित्साविद्याऽध्यापनं स्यात्। तथैव तत्तत्क्षेत्रे यानि उपकरणानि अपेक्षितानि स्युः, तैर्युक्तः आचार्यः एव उपकरणवान् सत् साधु विद्यादाने समर्थः स्यात्। तमत्र उपकरणवन्तमिति पदेन उल्लिख्यते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वेन्द्रियोपपन्नमिति क्षेत्रीयकर्मकरणे कौशल्यार्थं, स्वशिष्यपालनादिषु साफल्यार्थं च सर्वेन्द्रियपोपन्नत्वमुक्तम्। लोके तु कुत्रचित् असर्वेन्द्रियोपपन्नाः अपि स्वाचार्याः दृश्यन्ते, ते तु ज्ञानवैशाल्यात् दैवाच्च विहीनेन्द्रियत्वमप्यतिक्रमन्ते। तेषामत्र सामान्यत्वकथनात् न प्रसक्तिः। सर्वथा खलु अतिविदुषां कार्याणि सामान्यातिक्रान्तानि एव। प्रकृतिज्ञमित्यत्र आयुर्वेदशास्त्रे प्रकृतिशब्दस्य नैकेऽर्थाः सन्ति। सृष्ट्युत्पत्तिप्रसङ्गे अव्यक्ताद्यष्टधातुकी प्रकृतिरुक्ता। अन्यत्र प्राणिनां स्वभावस्य प्रकृतिसंज्ञा दत्ता। क्वचिच्चान्यत्र शरीरमनसोः स्वस्थस्थितिरेव प्रकृतिरुच्यते। सर्वेष्वप्यर्थेषूक्ताः प्रकृतयः सुवैद्यैः अवगन्तव्या एव। अन्यज्ञानक्षेत्रेषु तु शरीरमनसोः प्रकृत्यवगमनं कदाचिदनपेक्षितं स्यात्। तेष्वप्याध्यात्मिकपाठकेषु त्वाद्योक्त-प्रकृत्यवगमनमनिवार्यमेव। प्रकृतिरुच्यते स्वभावो यः इति यदुक्तं चरकेण, तत्प्रायेण सामान्यकथनार्थं स्वीकर्तुं शक्यं भाति। यतो हि सर्वथाऽपि आचार्यैः स्वशिष्यानां स्वभावास्त्ववगन्तव्या एव। प्रतिपत्तिज्ञमित्यत्र प्रतिपत्तिः प्रवृत्तिरुच्यते (शब्दकल्पद्रुमः)। ननु अधीतायाः विद्यायाः पष्ठात्काले जीवनयापने यौगिकत्वं तु ज्ञेयमेव। तद्यो जानाति सः प्रतिपत्तिज्ञः, तं तथा। अनुपस्कृतविद्यमिति चक्रपाणिना विव्रियते - **अनुपस्कृतविद्यमिति शास्त्रान्तरज्ञानेन नास्त्येवोपस्कृता विद्या यस्य स तथा; य आयुर्वेदज्ञः सञ्शास्त्रान्तरेणापि संस्कृतो भवति, स तु नितरामुपादेयः** इति। अत्रैव शास्त्रान्तरज्ञानस्य प्रयोज्यत्वमुक्तम्। ननु शास्त्रान्तरज्ञानेन स्वीयज्ञानस्य कालुष्यं न भवेत्। यदि शास्त्रान्तरज्ञानेन स्वीयज्ञानं संस्कृतं सत् वर्धते चेत्तर्हि तत् शास्त्रान्तरज्ञानं श्रेयसे एव। शास्त्रान्तरज्ञानेन प्राप्तज्ञाने संशयोत्पत्तिः, तत्पश्चाच्च स्खलनं न खलु विदुषां लक्षणमिति कृत्वा आचार्यलक्षणेऽत्र अनुपस्कृतविद्यमिति पदमुक्तम्। तत्स्पष्टीकर्तुमेव चक्रपाणिना शास्त्रान्तरज्ञानेन संस्कृतो

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यः सः उपादेयः एवेति विवृतम्। अनहङ्कृतमित्यनेन अहङ्कारयुक्तः सदा परयोनिभ्यः ज्ञानस्वीकारेऽसमर्थः भवतीति भावो दर्शितः। तथैव अनसूयकमपि। असूयकस्य हि बुद्धौ अशुद्धिर्भवेत्। ज्ञानकुशलतया यदि स्वशिष्योऽपि गुरोः परं वर्धमानः गच्छेत्, तदपि अहङ्कारासूयायुक्तः न सहेत्। आचार्यः खलु सर्वदा शिष्यहिताय एव यतेत, न कदाचित् शिष्यस्य अपरस्य वा उन्नतिं दृष्ट्वा असूयाम् अनुभवेत्। अकोपनमिति क्रोधरहितम्। उच्यन्ते हि सर्वशास्त्रेषु क्रोधस्य हानिकारित्वम्। पूज्यमाने आचार्ये न क्रोधः शोभते इति कृत्वा अकोपनमिति लक्षणमुक्तम्। क्लेशक्षममिति अध्यापनवेलायां स्वक्षेत्रीयकर्मकरणे वा उत्पद्यमानानां क्लेशानां सहनशीलतायुक्तम्। शिष्यवत्सलमित्यनेन शिष्येषु वात्सल्यं विना नैव अध्ययनाध्यापनकार्यक्रमः सुखेन चलेदिति दर्शयति। ततः परमिदं पदमुच्यते - अध्यापकमिति। प्रायोऽद्य सर्वत्र विद्यालयमहाविद्यालयेषु यः छात्रान् पाठयति सः अध्यापकः उच्यते। परं चरकेण तु आध्यापकत्वम् आचार्यस्य गुणेष्वन्यतमत्वेनोक्तम्। अतोऽवश्यं चर्च्यमिदं लक्षणं भाति।

अधि-उपसर्गात् इङ्-अध्ययने इति धातोः णिच्प्रत्ययस्य ततः ण्वुल् प्रत्ययस्य च योगात् अध्यापकशब्दो व्यत्पद्यते (शब्दकल्पद्रुमः)। अध्यापयतीति अध्यापकः (वाचस्पत्यम्)। अन्यच्च, अमरकोषे अध्यापकशब्दस्य पर्यायः उपाध्यायः इत्युक्तः। यः अध्ययनं कारयति सः अध्यापकः। अध्यापकशब्दश्च चरके लक्षणत्वेन उक्तः, न संज्ञात्वेन। एवमेव आचार्ये अध्यापनत्वं वर्णयति अयमपि श्लोकः -

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ।।

(मनुस्मृतिः २.१४०)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यः शिष्यं सकल्पं सहरस्यं च अध्यापयति सः आचार्यः उक्तः। न केवलम् आचार्य्ये अध्यापनत्वमुक्तम्, अपि तु उपाध्यायेऽपि। श्लोको हि -

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थं उपाध्यायः स उच्यते।।

(मनुस्मृतिः २.१४१)

ननु उपाध्यायोऽपि अध्यापयति। कः पुनः आचार्य्योपाध्ययोः भेदः इति चेत्, उपाध्यायः पाठ्यैकदेशमेव बोधयति, वृत्त्यर्थं च। आचार्य्यवर्णने तावत् अध्यापनक्रियायाम् आचार्यस्य प्रयोजनं नोक्तम्। अनेन उपाध्यायवर्णनेन अमरकोषस्य उपाध्यायाध्यापक-पर्यायत्वकथनमपि समर्थ्यते। अद्यतनाध्यापकास्तु पृथक् पृथक् पाठ्यैकदेशं बोधयन्ति, वृत्त्यर्थं च। ते नाचार्यवत् सरहस्यं वा बोधयन्ति। द्वयोरेतयोः श्लोकयोरध्ययनादेतत्संहियते - आचार्य्यैः कर्तव्यमध्यापनं सकल्पं, सरहस्यं च भवति, उपाध्यायस्य अध्यापनत्वं तु ततो विषयवैशाल्ये हीनमेव, प्रयोजनं च तस्य वृत्त्युत्पादनं भवति।

अधुना पुनः, चरकोक्तम् आचार्यस्य अध्यापकत्वलक्षणं चिन्त्यते। अध्यापनमत्र निस्स्वार्थप्रयोजकं स्यात्, यतो हि उपाध्याये स्ववृत्तिप्रयोजनं वर्णितं, नाचार्ये। शास्त्रीयाः परम्पराक्रमेण सरन्तः गुप्तविषयाः अपि आचार्यैः अध्याप्याः इति लभ्यते। यतो हि अग्रे उच्यते - यच्चाचार्यः शिष्याय शुश्रूषवे प्रसन्नः क्रमेणोपदिशति गुह्याभिमतमर्थजातम् (चरकसंहिता-विमानस्थानम्-८.१५) इत्यादि। एवं शिष्यस्य अध्ययनकरणे सामर्थ्योत्पादनं, गुह्यार्थकथनं, निस्स्वार्थबोधनं चेति त्रयमेतत् अध्यापकशब्देन आचार्यलक्षणकथनेन गुप्तनिर्दिष्टत्वेनावगम्यते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुद्रितवचनेऽस्मिन् चरमं लक्षणमुच्यते - ज्ञापनसमर्थमिति। ज्ञा-धातोः णिच्प्रत्ययात् ततो भावे ल्युट्प्रत्ययययोगात् ज्ञापनशब्दस्योत्पत्तिः। बोधनमिति यावत्। ननु अध्ययनाध्यापनप्रक्रियायाः मूलभूतं प्रयोजनं तु ज्ञानोत्पादनमेव। यदा शिष्यः स्वयं ज्ञानसम्पादन-समर्थो भवति, तदा खलु आचार्य्यस्य कार्यं सफलं मन्यते।

पर्यवदातश्रुतः परिदृष्टकर्मा दक्षः दक्षी शुचिः जितहस्तः उपकरणान् सर्वेन्द्रियोपपन्नः प्रकृतिज्ञः प्रतिपत्तिज्ञः अनुपस्कृतविद्यः अनहङ्कृतः अनसूयकः अकोपनः क्लेशक्षमः शिष्यवत्सलः अध्यापकः ज्ञापनसमर्थश्च आराध्यः आचार्यः उक्तः।

एवङ्गुण इत्यादि। उपरिवर्णितैर्गुणैर्युक्तो ह्याचार्यः सुशिष्यं वक्ष्यमाणशिष्यलक्षणयुक्तं वैद्यगुणैः तच्छास्त्रावश्यकगुणैः सम्पादयति। अत्र दृष्टान्तो दत्त - यथा आर्तवः ऋतौ भवः मेघः सुक्षेत्रं पादपपोषणयोग्यमृत्तिकादियुक्तं शस्यगुणैः तत्क्षेत्रप्रयोजनगुणैः सम्पादयति, तथैवेति।

परन्तु, आधुनिके प्रायः अयं गुरुशिष्यपरम्परा न प्रसिद्धतया वर्तमाना दृश्यते। विद्यालयः खलु संप्रति सर्वशास्त्रावबोधको वर्तते। गुरुशिष्यपरम्परायामसत्यां कस्यचिदपि मनुष्यस्य जीवनगुणागुण-निश्चितिः विद्यालयेनैव क्रियते, कदाचित् नापि कुटुम्बेनेति कथ्यते चेन्न दृश्यते तत्र काचिद्बाधा। अतश्चैव विद्यालयचयने बहुः महान् यत्नो विधीयतेऽधुना। तत्रापीदमेव चरकवचनं मार्गदर्शनत्वेन योक्तुं शक्यम्। तत्कथमिति अग्रिमे मासे चर्चयिष्यते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदरञ्जनी - ७

Dr. N. SRIDHAR,
SCSVMV, Kanchipuram

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)



वामतः दक्षिणम्

१. जिह्वेन्द्रियाधिष्ठानम् (२)
३. रोग विशेषः, क्षवथुः (२)
४. दशरथपुत्रभरतस्य पुत्रः (२)
५. रोहिणीपुत्रः, बलरामः (४)
६. देवयोनिविशेषः (२)
७. दक्षः (२)
८. सूर्यः (४)
१०. कंसः अस्य श्याला - सम्बोधने (४)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१२. सरोवरः (३) १३. अहङ्कारः (२)
१४. अगस्त्यमुनेः पत्नी (२) १५. अथवा (२)
१६. गीतम् (२) १७. हस्तिगण्डजलम् (२)
१८. शब्दः (२) १९. बद्धुं किञ्चन अस्त्रम् (२)
२१. क्षम् धातोः लट्-आत्मने-उ.पु.-एक.व. (२)
२२. चौरः, कितवः (३) २४. यज्ञः (२)
२५. व्यञ्जनम् (३) २७. शरीरमध्यभागः (२)
२९. वातायनम् (३) ३१. गङ्गा (४)
३६. कृष्णः, केशिनं हतवान् (३)
३८. ताडकायाः पुत्रः (३) ३९. जलं नदीं वा बध्नाति (२)

उपरिष्टात् अधः

१. आकाशः (४) २. दुर्गया हतः एषः (५)
३. शररीम् (२) ४. परीक्षितः अनेन दष्टः (३)
६. यूषः (३) ९. चक्रम् (४)
१०. मज्ञा (२) ११. मुखम् (३)
१२. व्याकुलः, अधीरः, भीरुः (३)
१४. मुनिविशेषः (३) १६. धेनवः (२)
१८. रम् धातोः लट्-आत्मने-प्र.पु.-द्वि.व. (३)
१९. पचनक्रिया (२)
२०. या धातोः लोट्-परस्मै-उ.पु.-बहु.व. (२)
२२. त्यागः (२) २३. पर्णगृहम् (२)
२६. बुद्धिः (२)
२७. बाहोः अधो भागः (बाहुमूलम्)(२)
२८. अनन्तरं, मङ्गलम् (२) ३०. धूलिः (४)
३२. क्षीरं, जलम् (२)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३३. गान्धार-राजकुमारी (३) ३४. चूडामणिः (२)

२५. भोजनम् (३)

एकाक्षरी

३७. समाप्तिसूचकशब्दः

पदरञ्जनी - ६ (उत्तराणि)

अ[1]	भि	ला[2]	पः		क[3]		न[4]	कु[5]	लः
हिः		टः		उ[6]	द	कम्		ञ्च	
	उ[7]		च[8]	प	ल		वि[9]	र	ल[10]
श[11]	प	से[12]		वी[13]	कः		शा		ला
	न[14]	व	नी	तम्		क[15]	र	हा	टः
भा[16]	च	ते			ना[17]	र	दः		
मा[18]	नम्		नि[19]	ज[20]		त		अ[21]	लिः
		रः[22]		पा[23]	ता[24]	लः		नु	
व[25]	क[26]		व्या[27]	कु	लः		प[28]	रा	गः
ल[29]	लि	ता		सु		द्वि[30]	वि	धा	
रा[31]	का		रा[32]	मम्		प[33]	त्र		अ[34]
मः		भ[35]	ज		वा[36]		कम्[37]	वो[38]	ज
	हि[39]		ता[40]	रा	पी	डः		ध[41]	रः

साधूत्तरं प्रेषितवतां विवरणम्

१. गौरी वेङ्कटरामः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

साहित्यचित्रम्



तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम् ।
स्वागतेनाभिनन्द्याग्रासने चोपवेशयत् ।। २० ।।
तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम् ।
पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत् ।। २१।।

श्रीमद्रामायणे-उत्तरकाण्डे ९७ सर्गे

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Registration with Registrar News Paper of India 30478 / 77

SAMSKRITASRI

मैत्रीं भजताऽखिलहृज्ज्ञेत्रीम्
आत्मवदेव परानपि पश्यत।
युद्धं त्यजत, स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणम्
जननी पृथिवी कामदुघाऽऽस्ते
जनको देवः सकलदयालुः
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात्सकलजनानाम्।।

Printed by: Zigma Graphics, 9/1, Thirtharappan Street, Triplicane - 5

Edited and Published by Sri S. Srinivasa Sarma on behalf of the

Samskrit Education Society (Regd.)

Old 212/13-1, New No, 11, St. Mary's Road, R.A. Puram, Chennai - 600028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,